वि.सं. – २०७४
वर्ष – ६
अङ्क – १

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा।।

# श्री निःश्रेयसम्

षाण्मासिक–पत्रम्

११

सम्पादकः
पंन्यासश्रीसम्यग्दर्शनविजयगणी

# श्रुणुत... श्रुणुत... श्रुणुत...

**श्रुणुत धीषणाधिरितपूर्वसज्जनाः सज्जनाः!**

**रत्नत्रयीतत्त्वत्रयीसमुपासनसमग्रा मुनिपुङ्गवाः!**

येषां नाम अपि मन्त्रायते! श्रुतं स्मृतं वा जीवनं सुखायते। हृदि धारणं संयतायते, गुणानुरागो रोहणायते, गुणानुवादो वाचस्पतीयते। तेषां स्वनामधन्यपरमगुरुदेवश्रीमद्**विजय प्रेमसूरीश्वराणां** प्रचलन्तं समाधिपर्वसुवर्णवर्षं वि.सं. २०७४ वैशाखकृष्णैकादश्यां पूर्णतामेति, ततः **समाधिपर्वसुवर्णवर्ष-स्मृतिरुपः प्रचिकटयिषित'निःश्रेयसं'विशेषाङ्कः**

तत्रभवतां भवतां हृत्कमलसृत-करकमल-लिखितलेखका-व्यादिभिः समृद्धीभावमिच्छति तत्तूर्णं प्रेषयतु कृपयेति निवेदयति सम्पादकः।

वैक्रमीयाब्दम्: २०७४
वर्षः ६
अङ्कः १

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा।।

# श्री निःश्रेयसम्

## षाणमासिक-पत्रम्

११

सम्पादकः
पंन्यासश्रीसम्यग्दर्शनविजयगणी

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीं श्रीशङ्खेश्वरपार्श्वनाथाय नमः।।
।। पूज्येभ्य आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः।।
।। पूज्येभ्यो मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरिभ्यो नमः।।


**श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-११)**
वर्षः ६ अङ्कः १

**निमित्तम्**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां दीक्षाशताब्दीवर्षः वैक्रमीयः२०६९

**आशीर्वादः**
सुविशालगच्छनायकाः पू.आ.श्रीविजय**पुण्यपाल**सूरीश्वराः
प्रवचनप्रभावकाः पू.आ.श्रीविजय**मुक्तिप्रभ**सूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री**वज्रसेन**विजयगणिवराः

**प्रेरणा**
प्रसिद्धप्रवचनकाराः पू.आ.श्रीविजय**श्रेयांसप्रभ**सूरीश्वराः
प्रवचनकुशलाः पू.आ.श्रीविजय**हेमप्रभ**सूरीश्वराः

**सम्पादकः**
पूज्य पंन्यासप्रवरः श्री**सम्यग्दर्शन**विजयगणिवराः

**संशोधकः**
अमृत पटेलः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरू पू.आ.श्रीविजयहीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद

**प्रकाशनम् :**
वि.सं. २०७४, पोष शुक्ला त्रयोदशी,
रविवार, दि. ३१ डिसेंबर २०१७

* **प्रतय :** ७५०
* **मूल्यम् :** ₹. २००


---


**आभारः.....अनुग्रहः.....अनुमोदनम्.....**
प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजय**श्रेयांसप्रभसूरी**श्वराणामुपकारस्मृत्यर्थम्
**''वर्षिल अशोक छेडा'' महाभागस्य आत्मश्रेयार्थम् ''अशोक भवानजीभाई छेडा परिवारेण''**
अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य सञ्चालकगणः**

# ।। प्रतिघोषः ।।


सम्मानपत्रम्
संस्कृत विभागः, भाषासाहित्यभवनम्,
गुजरात विश्वविद्यालयः, अमदावाद
संस्कृतभाषायाः संस्कृतविद्यायाः च
प्रचार-प्रसाररूपसेवाकर्मणि
सततम् संलग्नम्
निःश्रेयसम्
संस्कृतपत्रिका-परिवारम्
सविशेषम् सम्पादकम् प्रकाशकम् च
अमदावादस्थः गुजरात विश्वविद्यालयः
सादरम् सम्मानयति अभिनन्दति च ॥
अध्यक्षः
संस्कृतविभागः
भाषासाहित्यभवनम्
कुलपतिः
गुजरात विश्वविद्यालयः
अमदावाद
का. कुलसचिवः
गुजरात विश्वविद्यालयः
अमदावाद
GUJARAT UNIVERSITY
With Gratitude From
Gujarat University, Ahmedabad, India

# ।। पृथ्वीष्वपि जीवत्वं सत्यापितम् ।।

मानवेषु पशुष्वपि च जीवत्वमस्ति इति दृश्यते। यतस्तत्राऽनैकपुनर्जन्मादिकारणेन सर्वैरास्तिकैस्तत् स्वीक्रियते। मानवेषु पञ्चेन्द्रियाणि सन्ति। तिरश्चामपि पञ्चेन्द्रियाणि सन्ति। किन्तु स्पर्शमा स्पर्शेन्द्रियवानेकेन्द्रिय जीवाः। स्पर्श-रसन संयुक्ता यः सः द्वीन्द्रियो भवति। यः स्पार्शक-रसन-घ्राणसंयुतस् त्रीन्द्रिय उच्यते। ये स्पार्शन-रसन-घ्राण-चक्षुरिन्द्रिययुक्त स चतुरिन्द्रिय उच्यन्ते। ये तु स्पार्शन-रसन-घ्राण-चक्षुः-श्रोत्रेन्द्रियसमन्वितो पञ्चेन्द्रियः कथ्यन्ते समयज्ञैः।



## આ પથ્થરોમાં જીવ છે, એનો આકાર સતત વધતો રહે છે

પથ્થરો પોતાના આકાર કેટલાંક વર્ષો બાદ બદલવા માટે જાણીતા છે, પરંતુ એક એવું પણ ગામ છે જ્યાંના પથ્થરો વિશે એવું કહેવામાં આવે છે કે એ પોતાના આકાર એટલા ઝડપથી બદલી લે છે જેના કારણે લોકો એને જીવંત માનવા લાગ્યા છે. પથ્થરોના આકારમાં થતો વધારો લોકો માટે અજાયબી સમાન છે. આ પથ્થરો રોમાનિયાના એક ગામમાં આવેલા છે. આ પથ્થરો વિશે જિયોલોજિસ્ટ ઘણી વખત રિસર્ચ કરી ચૂક્યા છે, પરંતુ એમનું વધતું કદ એક વણઉકેલ્યા રહસ્ય સમાન છે. ગામના લોકોનું કહેવું છે કે પાણીના સંપર્કમાં આવ્યા બાદ એમના આકારમાં સતત ફેરફાર થઈ રહ્યો છે. બીજી તરફ કેટલાક વૈજ્ઞાનિકોનું માનવું છે કે વરસાદના દિવસોમાં આ પથ્થરોના કદમાં થતા વધારાનું કારણ એમનામાં રહેલી મિનરલ સૉલ્ટની માત્રા હોઈ શકે છે. જોકે અત્યાર સુધી એના કોઈ પુરાવા હજી સુધી નથી મળ્યા.

गमनागमनादिक्रियारहितत्वेन पृथ्वी-जल-वह्नि-वायु-वनस्पत्यादयः एकेन्द्रियाः सन्ति। सर्वेऽपि जीवाः अस्मत्सदृशा भवन्ति। कर्माधीनतया गमनागमनादिक्रियारहितत्वेन न स्वमभिजानन्ति। तथाऽपि ते जीवाः सन्तीति मन्तव्यम्। वर्तमानेऽपि तेषां श्रद्धा भवेदिति सत्यघटना घटिता साऽत्र प्रदर्श्यते।

''मिड्डे इति प्रसिद्धनामके पत्रे इ.स. २०१७ तमे ज्ञानपञ्चमीदिने प्रकाशिते लेखे स्पष्टतया दृश्यते यत् पृथ्व्यामपि जीवत्वमस्ति। अस्ति वा पृथ्वी स्वयं जीवरूपा।

तत्र लिखितमासीत् यत्, प्रस्तराणा-माकारः कतिपयवर्षानन्तरं परिवर्तते। किन्तु ''रोमानिया'' देशे कस्मिंश्चित् ग्रामे झटिति आकारपरिवर्तनं वृद्धिश्च भवति, इति सर्वेऽपि ग्रामवासिनः मन्यन्ते, यद् एते प्रस्तराः सजीवाः सन्ति। किन्तु ये जीवत्वं न स्वीकुर्वन्ति तेषां न कोऽपि मार्गोऽस्ति। केचित् कथयन्ति प्रस्तरो जलसम्पर्केण प्रजायतेऽसौ। केऽपि वैज्ञानिकाः कथयन्ति- वर्षाजलपतनसमये प्रस्तरा वर्धन्ते, ''मिनरल सोल्टस्य'' मात्रा वृद्धिंगताऽस्ति ततो वर्धते। किन्तु तेऽपि न कस्मिंश्चित् निर्णये समागताः।

जैनेन्द्रशासने तु पृथ्व्यादिषु जीवत्वं प्ररूपितं। यथा दशवैकालिकसूत्रे

**''पुढवी चित्तमन्तमक्खाया अणेग जीवा पुढो सत्ता,**
**अन्नत्थसत्थ परिणएणं।।१।। दशवै. ४ अ**
**पृथ्वीचित्तसंयुक्ता, आख्याता, अनेकजीवाः।**
**पृथक् सत्ता अन्य शस्त्रेण परिणता भवति।।''** अर्थात्

जीवत्ववती पृथ्वी प्ररुपिता, अनेकसूक्ष्मजीवसंयुक्ताः, साऽपि जीवत्वेन पृथक् सत्तां दधाति। केनाऽप्यन्यशस्त्रेण सा परिणता निर्जीवा भवति।

इत्यादिवचनेन पृथिव्यां जीवत्वमस्ति इति स्पष्टं भवति। तत्तु बहुविधतर्केण जिनवचनश्रद्धया च स्वीकरणीयम्। पृथ्वी जीवत्ववती पत्रवृद्धिहानिदर्शनात् वनस्पतिवत्। वनस्पत्यां तु जीवत्वमाधुनिकैरपि साधितमेव। इत्यादिनैकतर्कसङ्गतवचनोल्लेखयुतलेखलेखाभिः शोभमानं **''श्रीनिःश्रेयसम्''** वाचकाः पठन्तु, विद्वज्जनाः पाठं पाठं प्रीयन्ताम् इत्याशासे।

– प्रसिद्ध प्रवचनकार, पू.आ.श्रीविजयश्रेयांसप्रभसूरिशिष्याणु-सद्गुरुचरणसेवाहेवाकः
**पंन्यास श्रीसम्यग्दर्शनविजयगणी**

बाह्यसंसारे गृहं, धनं, कुटुम्बीजनमित्यादिकानां भृत्यत्वम्,
अभ्यन्तरसंसारे च विषयकषायेन्द्रियाणां भृत्यत्वम्।।

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| विभाग : १ प्राचीनकृतयः | | |
| खण्ड : १ पूर्वमहर्षीणां वचनामृतम् | | |
| * श्री नन्दिस्तुतिः | मुनि श्रीधर्मतिलकविजयो गणी | 9 |
| * ।। श्रीविहरमानजिनस्तोत्रम्।। | मुनिश्रीधर्मतिलकविजयो गणी | 11 |
| * श्रीचतुर्विंशतिजिनस्तवः। | मुनिश्रीधर्मतिलकविजयो गणी | 13 |
| * चतुर्विंशतिजिनस्तवनम् | साध्वीजीश्रीक्षमानिधिश्रीः। | 16 |
| * 'नमोऽस्तु' स्तुतिः सावचूरिः | साध्वीजीश्रीमृगेन्द्रजयाश्रीः | 18 |
| * विशाललोचन स्तुतिः सावचूरिः | साध्वीजीश्रीदिव्यदर्शनाश्रीः | 19 |
| * 'चउक्कसाय' सावचूरि. | सं. साध्वीजीश्रीमृगेन्द्रजयाश्रीः | 20 |
| विभाग : २ अर्वाचीनकृतयः | | |
| खण्ड : २ यशोप्रज्ञादर्शनम् | | |
| * ।। परमज्योतिः पञ्चविंशतिका ।। | आचार्य श्रीविजयकल्याणबोधिसूरिः | 22 |
| * ।। वृत्तं यशोविजयवाचकपुङ्गवानाम्।। | पंन्यासश्रीसम्यग्दर्शनविजयो गणी | 23 |
| खण्ड : ३ सूरिरामचन्द्रदीक्षाशताब्दीभावाञ्जलिः | | |
| * गुरुगुणत्थवकुलगम् | आचार्यश्रीविजयवीरशेखरसूरिः | 26 |
| * यावच्चन्द्र-दिवाकरौ जयतु सः श्रीप्रेमसूरीश्वरः | गच्छाधिपतिआचार्यश्रीविजयपुण्यपालसूरिः | 28 |
| * श्रीप्रेमशतकम् | आचार्यश्रीविजयमुक्तिप्रभसूरिः | 30 |
| * रामचन्द्रसूरि स्तुत्यष्टकम् | आचार्यश्रीविजयमुक्तिप्रभसूरिः | 33 |
| * रामचन्द्रं गुरुराजं शरणं तं श्रये | आचार्यश्रीविजयतपोरत्नसूरिः | 35 |
| * श्री रामचन्द्रीयमहाकाव्यम् | पंन्यासश्रीमोक्षरतिविजयो गणी | 36 |
| * गुणांशं वर्णयाम्यहम् | पंन्यासश्रीधर्मदर्शनविजयोगणी | 41 |
| * सम्यग्ज्ञानम् | प्रशमरक्षितविजयो मुनिः | 42 |
| * सूरिरामचन्द्रदीक्षाष्टकम् | साध्वीजीश्रीदिव्यरत्नाश्रीः | 43 |
| * ।। समर्पणाष्टकम् ।। | साध्वीजीश्रीचिंतनप्रियाश्रीः | 44 |
| * रामचन्द्रः स सूरीन्द्रो भूयाद् भव्यप्रशान्तये | श्री भालचन्द्र कविः-खंभात | 45 |
| खण्ड : ४ प्रकीर्णककृतयः | | |
| * ।। सात्म्यभोजनम्।। | आचार्यश्रीविजयकल्याणबोधिसूरिः | 48 |
| * कस्तावत् परमार्थतो नास्तिकः ? | आचार्यश्रीविजयरत्नसेनसूरिः | 49 |
| * "किमयं किम्पाकवृक्षः" | आचार्य श्रीविजयहेमप्रभसूरिः | 50 |
| * ।। ऋद्धिः।। | श्रीकमलः | 53 |
| * चारित्र सप्तविंशतिका : १६ | पंन्यासश्रीसम्यग्दर्शनविजयो गणी | 54 |
| * चारित्र सप्तविंशतिका : १७ | पंन्यासश्रीसम्यग्दर्शनविजयो गणी | 57 |

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| ❋ ।। जिनेश्वराणां परिमितदानविचारः।। | पद्मकीर्तिविजयो मुनिः | 60 |
| ❋ श्री ऋषभ अष्टकम् | राजदर्शन विजयोमुनिः (डेहेलावाळा) | 61 |
| ❋ ।। श्री शत्रुंजयस्तुति ।। | ज्ञानभूषणविजयो मुनिः | 62 |
| ❋ निष्फलता सफलताया जननी | प्रशमरक्षितविजयो मुनिः | 64 |
| ❋ आर्यत्वमिदं रमणीयतरम् | देवार्यः | 65 |
| ❋ आगमसाहित्यं प्रकरणसाहित्यं च | साध्वीजी श्री विरागदर्शनाश्रीः | 68 |
| ❋ ।। काव्यशास्त्रविनोदेन.....।। | साध्वीजीश्रीप्रशमनिधिश्रीः | 72 |
| ❋ ।। तत्वत्रितयपञ्चकम्।। | साध्वीजीश्रीव्रतरक्षिताश्रीः | 73 |
| ❋ जिनाज्ञापालनं परम् | साध्वीजीश्रीव्रतरक्षिताश्रीः | 74 |
| ❋ ।। सप्तविभक्त्याः श्रीरामस्तुतिः।। | श्री कल्याणगुणाश्रीः | 75 |
| ❋ ।। कथा ।। | साध्वीजी श्रीकल्याणगुणाश्रीः | 76 |
| ❋ किमाश्चर्यमतःपरम् | डॉ. कृष्णनारायणपाण्डेयः | 77 |
| ❋ 'संस्कृतकवितागौरवम्' | डॉ. रूपनारायण पाण्डेयः | 78 |
| ❋ सत्यभक्त-दोहावली | शान्तप्रकाशः सत्यदासः | 80 |
| ❋ भगवद्दर्शनं कृतम्।। | डॉ. आचार्यरामकिशोरमिश्राः | 82 |
| ❋ ज्वालयतु रे दीपपङ्क्तिम् | डॉ. प्रशस्यमित्र शास्त्री, राचबरेली | 83 |
| ❋ अमरफलम् | डॉ. रामकिशोर मिश्रः | 85 |
| ❋ ।। सूक्तिमाला ।। | पंन्यासश्रीसम्यग्दर्शनविजयो गणी | 88 |
| खण्ड : ५ मधुरं मधुरं मधुराधिपतेः सर्वं मधुरम् | | |
| ❋ चैतन्यप्रवाहः | श्रेयःसरित् | 90 |
| ❋ जैनं जयति शासनम्..... | श्रेयोदर्शी | 92 |
| ❋ नवं नवं सौन्दर्यम्..... | श्रेयोदर्शी | 93 |
| ❋ परमपदपन्थाः | श्रेयःपथिकः | 94 |
| ❋ मधुरम्... मधुरम्... | श्रेयःपथिकः | 95 |
| ❋ आत्मैश्वर्यप्राप्त्युपायः | श्रेयस्करः | 96 |
| ❋ स्वादु-स्वादु शुद्धं-शुद्धम् सुखावहं-शुभावहम् | श्रेयःश्रीः | 97 |
| ❋ रहस्याऽऽस्वादः | श्रेयःसखा | 98 |
| ❋ ।। काव्य कौतुकम् ।। | श्रेयःसद्मा | 100 |
| ❋ वैविध्यम्..... | श्रेयःसेतुः | 102 |
| ❋ वैविध्यम्..... | श्रेयःसेतुः | 103 |
| ❋ साम्प्रतम्..... | श्रेयःसद्मा | 104 |
| ❋ वादः न वितण्डावादः | श्रेयःकान्तः | 106 |



## विभाग : १

# प्राचीनकृतयः

## खण्ड : १ पूर्वमहर्षीणां वचनामृतम्

प्रियाः वाचकाः!

**तिष्ठन्तु.....पठन्तु.....विचारयन्तु.....**

यद् धर्मधराधरणैकधरणिधरधर्माः महामनसो महात्मनां जीवनं हि तेषां वचने सङ्क्रामति। प्रथम खण्डे पूर्वर्षीणां वचनविन्यासः प्रस्तूयते।

भवन्तः तं श्रुण्वन्तु, संयमधैर्यमाप्नुवन्तु, धैर्यं जीवनं च स्थिरीकुर्वन्तु। ते महात्मनो बुद्धिवैभवेनाभयकुमारायन्ते, गंभीरतया क्षीरनीरेश्वरायन्ते, स्थिरतया सुमेरुशिखरायन्ते, शौर्येण धनञ्जयायन्ते, श्रुतधनेन धनदायन्ते, ज्ञानादि-दाने कर्णायन्ते, निरोगितया वज्रशरीरायन्ते, प्रमुदितचित्ततया महद्र्धिकविबुधायन्ते। निशेषगुणकलाकलापकलितास्ते सकलजनचकोरनयनानन्दप्रदरजनिकरायन्ते। दर्शनेनैव हर्ष प्रकर्षकारकाः प्रकृष्टपुण्यपुञ्जाः परमचरमसुखास्वादपरास्ते महर्षयः सदैव पृथ्वीतलं पवित्रीकुर्वन्ति। अत्र विन्यस्तस्तेषां वचनविन्यासः **भव्याः! पठन्तु, परं पाठयन्तु च।**

– परमः

# श्री नन्दिस्तुतिः

प्रेषकः- मुनि श्रीधर्मतिलकविजयो गणी

**अर्हंस्तनोतु स श्रेयः-श्रियं यद्ध्यानतो नरैः।**
**अप्यैन्द्री सकलाऽत्रैहि, रंहसा सह सौच्यत ।।१।।**

**व्याख्या** - सोऽर्हन् वीतरागः श्रेयःश्रियं मोक्षलक्ष्मीं तनोतु विस्तारयतु, स कः? यद्ध्यानतो यस्य ध्यानात् नरैर्मनुष्यैः ऐन्द्री इन्द्रसम्बन्धिनी अपि सा लक्ष्मीः। इत्यौच्यत इत्यवादि। इतीति किं, हे लक्ष्मि! त्वं सकलां समस्ता रंहसा वेगेन सह अत्र एहि अत्रागच्छ इत्यक्षरार्थः।।१।।

**ओमितिमन्ता यच्छासनस्य, नन्ता सदा यदङ्घ्रींश्च।**
**आश्रीयते श्रिया ते, भवतो भवतो जिनाः पान्तु ।।२।।**

**व्याख्या** - ते जिनास्तीर्थकराः भवतः युष्मान् भवतः संसारात् पान्तु रक्षन्तु। ते के? यच्छासनस्य ओं इति मन्ता पुमान् येषां शासनस्य, ओं इत्यङ्गीकारे, इदं शासनं सत्यमेवेति मन्ता मन्यमानः, चः पुनरर्थे, येषां चरणान् यदङ्घ्रीन् नन्ता पुमान्, सदा सर्वदा श्रिया लक्ष्म्या आश्रीयते इत्यर्थः।।२।।

**नवतत्त्वयुता त्रिपदीश्रिता, रुचिज्ञानपुण्यशक्तिमता।**
**वरधर्मकीर्तिविद्या-नन्दास्या जैनगीर्जीयात् ।।३।।**

**व्याख्या** - जैनगीर्जिनवाणी जीयात्, किंभूता जैनगीः? नवतत्त्वैर्युता, पुनः किंभूता? त्रयाणां पदानां समाहारस्-त्रिपदी, पुनः किंभूता? रुचिः सम्यक्त्वं ज्ञानमवबोधः, पुण्यं चारित्रं शक्तिरात्मवीर्यंच तद्वता मुनिजातेन पुरुषेण वा श्रिता आश्रिता। पुनः किंभूता? वरः प्रधानो दयामूलो धर्मः कीर्तिः विश्वसञ्चारिणी, विद्या केवलज्ञानादिका, आनन्दश्चाव्ययसुखरुपः, तेषां आस्या-स्थासना ''स्यादास्या स्थासना स्थितिरिति'' नाममालावचनात्।।३।।

**श्रीशान्तिः श्रुतशान्तिः, प्रशान्तिकोऽसावशान्तिमुपशान्तिम्।**
**नयतु सदा यस्य पदाः, सुशान्तिदाः संतुसन्ति जने ।।४।।**

**व्याख्या** - असौ श्रीशान्तिः अशान्तिं अकल्याणं उपशान्तिं नयतु, किम्भूतः श्रीशान्तिः? श्रुता विख्याता शान्तिर्भद्रं मोक्षो वा यस्यासौ/येनासौ श्रुतशान्तिः। पुनः किम्भूतः? प्रशान्तिः प्रशमः क्षान्तिर्विद्यते यस्य सः, 'शेषाद्वा कच् प्रत्ययः', प्रशान्तिकः। स कः? यस्य श्रीशान्तेः पदाः सदा जने लोके सुशान्तिदाः संतुसन्ति सम्पूर्वकः 'तुस ह्रस ह्लस रस शब्दे' (हे. धा ५३९= ५४२) धातूनामनेकार्थत्वात्-सम्यक्प्रकारेण तुसन्ति विद्यन्ते संतुसन्ति इत्येकमेव क्रियापदम्।।४।।

**सकलार्थसिद्धिसाधन-बीजोपाङ्गा सदा स्फुरदुपाङ्गा।**
**भवतादनुपहतमहा, तमोपहा द्वादशाङ्गी वः ।।५।।**

**व्याख्या** - द्वादशाङ्गी वो युष्माकं तमोपहा भवतात्, तमोऽज्ञानमपहन्तीति तमोपहा। किंभूता द्वादशाङ्गी? सकलार्थसिद्धिसाधनस्य बीजभूतान्युपाङ्गानि यस्यां सा, पुनः किंभूता, सदा स्फुरद्रूपाणि उप समीपे अङ्गानि यस्याः सा, पुनः किम्भूता? अनुपहतो महो महोत्सवो यस्याः सा अनुपहतमहा।।५।।

**वद वदति न वाग्वादिनि !, भगवति ! कः श्रुतसरस्वति गमेच्छुः।**
**रङ्गत्तरङ्गमतिवर-तरणिस्तुभ्यं नम इतीह ।।६।।**

**व्याख्या** - हे भगवति ! वाग्वादिनि ! त्वं वद, श्रुतसरस्वति श्रुतसुमद्रे गमनं कर्त्तुमिच्छुः कः पुमान् तुभ्यं नम इति इह न वदति? अपि तु वदत्येव। किंभूतः पुमान्? रङ्गत्तरङ्गमतिरेव वरा तरणिर्नौर्यस्य सः रङ्गत्तरङ्गमति-वरतरणिः।।६।।

**उपसर्गवलयविलयन-निरता जिनशासनावनैकरताः।**
**द्रुतमिह समीहितकृते स्युः, शासनदेवता भवताम् ।।७।।**

**व्याख्या** - शासनदेवताः द्रुतं शीघ्रं इह धर्मकृत्ये वदतां युष्माकं समीहितकृते स्युः। किंभूताः शासनदेवताः? उपसर्गवलयविलयननिरताः उपसर्गाणां वलयं, तस्य विलयनं भेदनं, तत्र निरताः। पुनः किम्भूताः? जिनशासनावनैकरताः जिनानां शासनं, तस्यावनं रक्षणं, तत्र एकमद्वितीयं यथाभवति तथा रताः प्रवृत्ताः।।७।।

**सङ्घेऽत्र ये गुरुगुणौघनिधे सुवैया-वृत्यादिकृत्यकरणैकनिबद्धकक्षाः।**
**ते शान्तये सह भवन्तु सुराः सुरीभिः, सद्दृष्टयो निखिलविघ्नविघातदक्षा।।८।।**

**व्याख्या** - ते सुराः देवाः सुरीभिर्देवीभिः सहात्रास्मिन् सङ्घे शान्तये भवन्तु। ते के देवाः? ये सुवैयावृत्त्यादिकृत्यकरणैनिबद्धकक्षाः, सुष्ठु वैयावृत्यादि च तत् कृत्यं च सुवैयावृत्यादिकृत्यं, तस्य करणं तत्र एकाऽद्वितीया निबद्धा कक्षा प्रतिज्ञा यैस्ते। किंभूते सङ्घे? गुरुगणौघनिधे गुरवश्च ते गुणाश्च गुरुगुणाः, तेषामोघः समूग्दृहः तेन निघः सम्पूर्णः, तस्मिन्। किंभूता सुराः? सद्दृष्टयः सत्प्रधाना दृष्टिर्येषां ते सद्दृष्टयः सम्यदृष्टय इत्यर्थः। पुनः किंभूता सुराः? निखिलविघ्नस्य विघातने नाशकरणे दक्षाः प्रवीणा इत्यर्थः।।८।।

इमावर्थकामौ हृदयपूर्वकं
त्यक्तुं यः शिक्षयति, स सुधर्मः ।।

अज्ञातपूर्वर्षिप्रणीतम्

# ।। श्रीविहरमानजिनस्तोत्रम् ।।

प्रेषक : मुनिश्रीधर्मतिलकविजयो गणी

श्रेयांसवप्रा जननी तु सत्यकी, वृषस्तु चिह्नं दयिता तु रुक्मिणी ।
जम्बूविदेहाऽऽभरणस्य यस्य, सीमंधरं तं सततं स्मरामि ।।१।।

माता सुतारा सुदृढः पितास्य, प्रियङ्गुमालाललनाधिनाथः।
गजध्वजो धर्मधुराधुरन्धरः, सार्वः श्रिये मे भवताद् युगन्धरः ।।२।।

सुग्रीवसूनुर्विजयाजयप्रदः, सुमोहिनीमोहितमानसाम्बुजः।।
मृगाङ्कतुल्याननभृन्मृगाङ्कभृत्, श्रीबाहुसार्वः शिवसंपदे वः ।।३।।

भूनंदया श्रीनिसढस्य सार्द्ध, मुदः प्रदः किंपुरुषाधिनाथः।
सन्मर्कटाङ्को विहरन् विदेहे, जीयात् सुबाहुः कदलीसुबाहुः ।।४।।

श्रीदेवसेनातनयो नयेन, युक्तः सदानन्दति देवसेनः।
दिनेश्वराङ्को जयसेनयाऽर्च्यो, जिनोऽभिजातो जयतात् सुजातः ।।५।।

सुमङ्गला मङ्गलमालिकाप्रदः, स्वयंप्रभोश्चित्रविभोर्विभूतिदः।
प्रियसेनापतिः शशिलांछितक्रमो, महाविदेहे जयताज्जिनेश्वरः ।।६।।

ऋषभाननानामकतीर्थनायकः, स्फुटं च कीर्त्याश्रितराजनन्दनः।।
जनितो वरवीरसेनया, हरिचिह्नस्तु जयावतीश्वरः ।।७।।

यस्य माता मङ्गलावती सती, मेघराजतनयस्य वर्त्तते।
अङ्गना विजयवत्यभीप्सितो-ऽनन्तवीर्यजिनराट् द्विपध्वजः ।।८।।

सूरप्रभः सूर्य्यसमप्रतापः, श्रीनागसूनुर्विमलाधिनाथः ।
भद्रो महाभद्रकरोऽर्यमाङ्कः, श्रीधातकीखण्डविदेहसार्वः।। ।।९।।

चन्द्रलाञ्छनधरो वरनन्द-सेनयानत इनोऽस्ति विशालः।
यस्य सा विजयवत्यभिधाना, यस्य सो विजयभूमिपतिश्च ।।१०।।

सरस्वती-पद्मरथस्य नन्दनः, शङ्खाङ्कितो वज्रधरो जिनेश्वरः।
विनायुत(?) श्रीविजयवत्युदर्च्यः, श्रीधातकीपश्चिमसद्विदेहे ।।११।।

चन्द्राननश्चन्द्रसमानतोयं, वल्मीकवंशे वरदीप्रदीपः।
लीलावतीशो वृषभध्वजोऽस्ति, पद्मावतीसूनुवरो वरश्रीः ।।१२।।

पद्माङ्कभाक् रेणुकया प्रसूतः, सुगन्धयाच्र्यो जिनचन्द्रबाहुः ।
देवाश्रितानन्दनृपप्रमोदकृत्, श्रीपुष्करार्द्धे विजयासुदारः ।।१३।।

श्रीभुजङ्गभगवन्तमाश्रये, श्रीमहाबलनृपस्य नन्दनम् ।
पद्मलाञ्छनधरं वरगन्ध-सेनया नतपदं महिमाभाजम् ।।१४।।

ईश्वरं मदनमर्दनेश्वरं, पालितं च सुयशोज्वलाम्बया ।
चन्द्रलाञ्छनधरं गजसेन-नन्दनं मुदितचन्द्रवतीशम् ।।१५।।

नेमिप्रभुः पुष्करभूषणं च, श्रीवीरराजोत्तमसेनयोश्च।
तनूरुहः सूर्यलाञ्छिताङ्घ्रिः, सन्मोहनीशो जयताज्जिनेन्द्रः ।।१६।।

सद्भानुमत्या जनितो जिनेन्द्रः, श्रीवीरसेनो हतमोहसेनः।
श्रीभूमिपालक्षितिपालबालो, महावृषाङ्को वरराजेसनः ।।१७।।

देव्या उमायाश्च सुदेवराज्ञस्-तनूद्भवो मे वितनोतु भद्रम् ।
श्रीमान् महाभद्रजिनाधिराजः, श्रीसूर्यकान्ताधिपतिर्गजाङ्कः ।।१८।।

स्फुरद्यशादेवयशा जिनेशः, श्रीसर्वभूतेः क्षिपिता[१]भिभूतिः ।
गङ्गाप्रसूतः शशिभृत् सुपद्मा-वतीश्वरो राजति पुष्कराख्ये ।।१९।।

श्रीराजपालतनयं पुष्करभूषणं, कनीनिकाबालकं त्वजितवीर्यम् ।
श्रीरत्नमालार्चितपादपद्मं, स्वस्तिकचिह्नं मुदा स्तवीमि ।।२०।।

जम्बूद्वीपमहाविदेहतिलकाश्चत्वार आद्या जिना-
श्चान्ये धातकिखण्डखण्डिततमा अष्टौ जिनाधीश्वराः।
अन्येऽष्टौ वरपुष्करार्द्धवसुधापीठे विहारक्रमं,
कुर्वन्तो रचयन्तु ते मम महानन्दोत्सवं शाश्वतम् ।।२१।।

इत्येवं पितृ-मातृ-लक्ष्म-ललना-नामप्रधाना जिनाः,
सर्वे पञ्च सुदीप्रहेमविमलाम्भोजैश्चरन्तो भुवि ।
विख्यातास्तु महाविदेहकेषु च मया भक्तिप्रकर्षान्नुतास्-
ते सर्व्वे मम दर्शयन्तु सततं सद्दर्शनं पावनम् ।।२२।।

**।। इतिश्री विहरमानविंशतिजिनस्तवनम्।।**

---

१) 'क्षपितारिभूतिः' इति भाति-'संशो.'।

श्री जिनप्रभसूरि–कविवर–विरचित–

# श्रीचतुर्विंशतिजिनस्तवः।

मुनिश्रीचन्द्रोदयविजयकृत–विवृतिसमलङ्कृतः।

– प्रेषक : मुनिश्रीधर्मतिलकविजयो गणी

## मूलम्

**जिनर्षभ ! प्रीणितभव्यसार्थ !**
**समस्तदोषाजित ! तीर्थनाथ !।**
**श्रीशम्भवाऽऽखण्डलवन्द्य ! नन्द्याः**
**स्वामिन् ! प्रजानामभिनन्दन ! त्वम् ।।१।।** (उपजातिः)

## अथ विवृतिमङ्गलम्।

सुरासुरैर्वन्दितपादपङ्कजं सदा दयाक्षितजन्तुसञ्चयम्।
समस्तकल्याणसुरावनीरुहं नमामि **तीर्थेशमहं** हृदाऽऽदिमम् ।।१।।

**श्रीनेमिसूरि**चरणाम्बुजयुग्ममन्तराधाय पूज्यचरणं शमिसार्थमुख्यम्।
**विज्ञानसूरि**मथ भक्तिभरैः प्रणम्य **कस्तूरसूरि**मिह गौरगुणं गुरुं स्वम् ।।२।।

**श्रीनाभिजन्ममुखवीरवरान्त**तीर्थराजां स्तुतिं भवभयोन्मथनप्रवीणाम्।
**चन्द्रोदयो** मुनिरहं विवृणोमि तेषां प्रीत्यै सताञ्च सुखबोधकृते सयत्नः ।।३।।

**अन्वयः** - प्रीणितभव्यसार्थ ! समस्तदोष ! तीर्थनाथ ! आखण्डल–वन्द्य ! प्रजानां स्वामिन् ! जिनर्षभ ! अजित ! श्रीशम्भव ! अभिनन्दन ! त्वं नन्द्याः ।।१।।

**विवृतिः- प्रीणितभव्यसार्थ !** = हे प्रसादितप्राणिसङ्घ ! अहिंसा–दिपञ्चमहाव्रता–दिदेशनया सर्वजन्तूनां प्रमोदोत्पत्तेरिति भावः। **समस्तदोष !** = परित्यक्तरागादिनिखिलदूषण ! यद्वा – समस्त ! इति दोषाजित ! इति च भिन्नपदेनापि व्याख्यानम्। तथा च – **समस्त !** = सम्पूर्ण!, जलरत्नादिभिः समुद्र इव ज्ञानदर्शनचारित्रादिभिः सम्भृत इत्यर्थः। **दोषाजित !** =

रागादिदोषानभिभूत ! ज्ञानादिना रागादिसकलदोषाणां दूरीकरणात् ते एव पराजिताः, न तु स्वयं तैरभिभूतः, स्वस्मिन् तेषां सत्त्वकथाया अप्यभावादिति सुष्ठूक्तं दोषाजित ! इति। **तीर्थनाथ!**= भवसागरसन्तरणसाधनीभूतप्रवचनाधारचतुर्विधसङ्घाधिप ! **आखण्डलवन्द्य !** = इन्द्राभिवादनीय!। ''इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो वज्री बिडौजा मघवान् पुरन्दरः। प्राचीनबर्हिः पुरुहूतवासवौ सङ्कन्दनाऽऽखण्डलमेघवाहनाः।।'' इत्यभिधानचिन्तामणिः (२-८५)। **प्रजानां**= जनानाम्'' ''लोको जनः प्रजा'' इत्यभि० (३-१६५)। **स्वामिन्!**= ईश ! तस्य वीतरागत्वेन यद्यपि कस्यापीशितृत्वं न सम्भवति, तथापि परमकारुणिकतया भवबन्धभिन्मार्गोपदर्शनेनाऽनुगृहीतैर्जनैर्भक्ति-प्रवणतया एवमुच्यते इति भावः। **जिनर्षभ!** = जिनश्रेष्ठ !। यद्वा-जिन इति ऋषभ इति च पृथक् पदं सम्बोधनम्। तथा च **जिन !** = रागद्वेषमोहादिजेतृपुङ्गव !, **ऋषभ !** = तदाख्यतीर्थङ्कर!, उर्वोर्वृषभलाञ्छनसत्वाज्जनन्या चतुर्दशानां स्वाप्नानामादौ वृषभदर्शनाद्वेति भावः। **अजित !** = तदाख्यद्वितीयतीर्थङ्कर !, श्लिष्टव्याख्यानेन परिषहादिभिरनभिभूत इति ध्वनिः। अस्मिन्नजिते गर्भस्थे द्यूतादिक्रीडायां राज्ञाऽस्य जननी न जितेत्यनुसन्धानेन पित्रा गृहीताऽजितनामक! इति च। **श्रीशम्भव !** = तदाख्यतृतीयतीर्थङ्कर ! श्रीयुक्तेऽस्मिन् स्तुते शं शुभं भवतीति व्याख्यानेन च श्रीशुभकारक इति ध्वनिः। **अभिनन्दन !** = तदाख्यचतुर्थतीर्थङ्कर !, गर्भात्प्रभृत्येवाभीक्ष्णं शक्रेणाभिनन्दनादिति भावः, हर्षप्रद! इति ध्वनिः। **त्वं नन्द्याः** = अभिवर्धस्व, अस्य प्रकृते सर्वत्राऽन्वयः।।१।।

**समस्तपदविग्रहः-प्रीणितभव्यसार्थ !** = भव्यानां सार्थः स प्रीणितो येन सः, तत्संबुद्धौ। समस्तदोष ! = समस्ता दोषा येन सः, तत्सम्बोधने। **दोषाजित !** = इतिच्छेदे तु = दोषैरजितः, तदामन्त्रणे। **तीर्थनाथ !** = तीर्थेषु नाथः, तदामन्त्रणे। तीर्थानां नाथ इति षष्ठीसमासस्तु शेषषष्ठ्या, न तु निर्धारणषष्ठ्या, तया समासनिषेधानुशासनात्। **जिनर्षभ !** = जिनेषु जिनानां वा ऋषभ इति पूर्ववत् समासः। जिनश्चासौ ऋषभश्चेति कर्मधारयो वा, तदामन्त्रणे। **अजित !** = न जितः, तदामन्त्रणे। **समस्तदोषाजित !** इत्येकसंबोधनत्वेन व्याख्याने - समस्ताः सकलाश्च ते दोषाश्च, तैरजितः, तत्सम्बोधने। **श्रीशम्भव !** = श्रीयुतः शम्भवः, तदामन्त्रणे। **श्लोकत्रयं यावदुपजातिश्छन्दः।।१।।**

## मूलम्

**सुखाय पुंसां सुमते ! मुखं ते**
**मृगाङ्क ! पद्मप्रभ ! गौरकान्ते !।**
**सुपार्श्व ! नेतर्महसेनपुत्र !**
**त्रैलोक्यलोकस्तवनीय ! भूयात् ।।२।।** (उपजातिः)

**अन्वयः-** नेतः ! त्रैलोक्यलोकस्तवनीय ! सुमते ! मृगाङ्क ! गौरकान्ते ! पद्मप्रभ! सुपार्श्व ! महसेनपुत्र ! ते मुखं पुंसां सुखाय भूयात् ।।२।।

**विवृतिः- नेतः!** = नायक !, अग्रणीरित्यर्थः। यो ह्यगणीर्भवति, स स्वानुगतान् कृत्याकृत्ये उपदिशति, अकृत्यपरिहारेण च कृत्ये एव प्रवर्त्तयति, स्वयं च तत्र प्रवर्त्तते, तद्वज्जिनोऽपि जनानिति सुष्ठूक्तं नेतरिति। **त्रैलोक्यलोकस्तवनीय !** = त्रिभुवनजनस्तुत्य !, अन्ये हि कतिभिरेव, अयं तु त्रिभुवनजनैरिति व्यतिरेकध्वनिः, यद्वा यो हि त्रिभुवनजनानां हितचिन्तकः, सत्पथप्रवर्त्तयिता, निःस्पृहश्च, स एव तैः स्तुत्यः। वीतरागतया परमकारुणिकतया चायमेव तथा नान्य इति त्रैलोक्यलोकस्तवनीयेत्युचितमेव। यद्वा **त्रैलोक्यलोक ! इति स्तवनीय !** इति च पृथक् सम्बोधनम्। तथा च त्रैलोक्यं लोकतेऽवलोकते सकलज्ञानावरणीय-कर्मक्षयजन्यकेवलज्ञानेनेति स तत्सम्बोधने, सर्वज्ञ ! इत्यर्थः। **स्तवनीय!** = स्तुतियोग्य ! न तु स्तोतुं शक्य !, गुणानामसमत्वादिति ध्वनिः। **सुमते !** = तदाख्यतीर्थङ्कर !, सद्‌बुद्धे ! इतिध्वनिः। मिथ्यात्वगन्धस्याप्यभावाद्, उपदेशादिना जनानां तन्नाशकत्वाच्चेति भावः। **मृगाङ्क !** = हरिणलाञ्छन ! श्री शान्तिनाथेत्यर्थः। यद्वा मृगाङ्कश्चन्द्रः, नामैकदेशेनामग्रहणाच्चन्द्रप्रभेत्यर्थः। गर्भस्थे भगवति मातुश्चन्द्रपानदोहदभावात् तदाख्यतीर्थंङ्करेत्यर्थः। **महसेनपुत्र !** = महसेनाऽऽख्यनरवरसुत!, श्रीचन्द्रप्रभेत्यर्थः। **गौरकान्ते!** = विशदशरीरच्छवे ! पद्मप्रभ ! = तदाख्यतीर्थंङ्कर !, कमलतुल्यकान्ते ! इति ध्वनिः। सुपार्श्व = तदाख्यतीर्थंङ्कर ! गर्भस्थे भगवति जनन्याः सुपार्श्वभावादिति भावः। शोभनकक्षाधोभाग इति, शोभनसमीपप्रदेश इति, शोभनफणिचक्र इति च ध्वनिः। **ते** = तव। **मुखं** = वदनम्। **पुंसाम्** = पुरुषाणाम्, उपलक्षणत्वात् प्राणिनामित्यर्थः। **सुखाय** = शाताय भूयात् ।।२।।

समस्तपदविग्रहः-त्रैलोक्यलोकस्तवनीय! = त्रयाणां लोकानां समाहारस्त्रिलोकी, सैव त्रैलोक्यम्, तत्र तस्य वा लोकास्त्रैलोक्यलोकाः, तैः स्तवनीयः, तत्सम्बोधने। सुमते! = सु शोभना बुद्धि र्यस्य स, तत्सम्बोधने। महसेनपुत्र ! = महसेनस्य पुत्रः, तत्सम्बोधने। मृगाङ्को ! = मृगोऽङ्के यस्य स, तत्सम्बोधने। गौरकान्ते ! = गौरी-कान्ति र्यस्य स, तत्सम्बोधने। पद्मप्रभ ! = पद्मस्य प्रभेव प्रभा यस्य स तत्सम्बोधने। सुपार्श्व! = सु शोभनौ पार्श्वौ यस्य, शोभनो वा पार्श्वो यस्य स, तत्सम्बोधने ।।२।।

रागादिशत्रून् निहत्य परमपदं प्राप्ताः,<br>भव्यसत्वाँश्च रागादिशत्रुपराभवं प्रापयितारं<br>मार्गं दर्शयन्ति - ते सुदेवाः ।।

# चतुर्विंशतिजिनस्तवनम्

– प्रेषिका : साध्वीजीश्रीक्षमानिधिश्रीः।

## श्रीसुमतिनाथजिननामस्तवनम्

**कां केशवस्तोषयति प्रकामं?, मुक्ताकलापं क्व दधाति कान्ता?।**
**किं धातुषु स्वीकुरुते गुरुत्वं?, ध्यानाज्जिनः कः शिवकृद् बुधानाम्?।।६।।**

**(इन्द्र वज्रा वृत्तम्)**

**अन्वय :** ''केशवः कां प्रकामं तोषयति?, मुक्ताकलापं कान्ता क्व दधाति?, धातुषु किं गुरुत्वं स्वीकुरुते?, ध्यायात् बुधानाम् कः जिनः शिवकृद्? (भवति) इत्यन्वयः।

**व्याख्या :**

**(१) केशवः**-श्रीकृष्णः **कां:** कां प्रियां **प्रकामं** प्रकृष्टं **तोषयति** सन्तुष्टां करोति? 'माम् अर्थात् लक्ष्मीम्'।

**(२) मुक्ताकलापं** मुक्तायाः कलापं मुक्ताकलापं अर्थात् मुक्ताहारं **कान्ता** रमणी **क्व** कस्मिन् स्थाने दधाति विभूषयति? **गले** अर्थात् कण्ठे, मुक्तामणिहारान् विभूषयन्ति रमण्यः इत्यर्थः।

**(३) धातुषु** धातुसमवाये स्वर्णादि-ताम्रादि धातुषु गुरुत्वं कस्याधिकं वर्त्तते? 'अयः' अयसः लौहस्य **गुरुत्वं** प्रसिद्धम्। अत्र अयः शब्दस्य लौहेत्यर्थः स्वीकृतः।

**(४) ध्यानात्** ध्यानात् **बुधानाम्** विद्वज्जनानां **कः जिनः** रागद्वेषादिकान् आत्मशत्रून् जिनः **शिवकृत्** कल्याणकृत् अस्ति? 'माम्-गले-अयः'-**माङ्गलेयः** मङ्गलायाः अपत्यं पुमान् माङ्गलेयः। अर्थात्-मङ्गलाया पुत्रः **श्रीसुमतिनाथः** सर्वोत्कृष्टेन वर्तते इति भावः।

## 'श्री पद्मप्रभजिननामस्तवनम्'

**किं नाम पूजार्थ मिहाभिधानं?, नोल्लङ्घते कां क्षुभितोऽपि वार्धिः ?।**
**को राजलक्ष्मीं समलङ्करोति?, कः स्याज्जिनः संसृतिसिन्धुसेतुः?।।७।।**

**(इन्द्रवज्रा वृत्तम्)**

**अन्वय :** पूजार्थं इह किं अभिधानं नाम?, क्षुभितः अपि वार्द्धिः कां न उल्लङ्घते?, कः राज्यलक्ष्मीं समलङ्करोति?, कः जिनः संसृतिसिन्धुसेतुः स्यात्? इत्यन्वयः।

**व्याख्या :**

(१) **पूजार्थं** पूजायाः अर्थे **इह** अस्मि**न् किं** कं **अभिधानं** कथनं **नाम** नामधेयं वक्तव्यम्? अर्थात्–पूजार्थे किं नाम वक्तव्यम्? **'सु'** (पूजार्थे 'सु' अव्ययमस्ति व्याकरणग्रन्थे)

(२) **क्षुभितः** आलोडितः **अपि** किन्तु अर्थात् विक्षोभितोऽपि **वार्द्धिः** अम्बुधिः **कां कस्यां न उल्लङ्घते? 'सीमाम्'** मर्यादाम् अर्थात्–विक्षोभितोऽपि समुद्रः सीमां न उल्लङ्घते।

(३) **कः** कीदृशः **राज्यलक्ष्मीं** राज्यस्य लक्ष्मी, राज्यलक्ष्मीः तां राज्यलक्ष्मीं राज्यश्रीं **समलङ्करोति? 'गजः'** हस्तिः। अर्थात्–गजराजः राज्यलक्ष्मीं समलङ्करोति।

(४) **कः जिनः** रागाद्यभ्यन्तरशत्रून् जयतीति जिनः वीतरागः, **संसृतिसिन्धुसेतुः संसृति (सिन्धुः)** संसाररूप**सिन्धुः,** सागरस्य **सेतुः** सोपानमार्गः अर्थात् संसारसागरसेतुरूपः?

'सु–सीमाम्–गजः' = सुसीमांगजः अर्थात् सुसीमामातुः सुपुत्रः=श्रीपद्मप्रभप्रभुः सर्वोत्कृष्टेन वर्तते।।७।।

श्रीजिनेश्वरभगवतः–
सेवाऽपि मङ्गलम्, पूजा मङ्गलम्,
उपासनाऽपि मङ्गलम्, भक्तिरपि मङ्गलम्,
किन्तु आज्ञाधीनता तु महामङ्गलम्।।

# 'नमोऽस्तु' स्तुतिः सावचूरिः

- साध्वीजीश्रीमृगेन्द्रजयाश्रीः

।।ऐं०।। नमोस्तु वर्धमानाय स्पर्धमानाय कर्मणा ।
तज्जयाऽवाप्तमोक्षाय परोक्षाय कुतीर्थिनाम् ।।१।।

येषां विकचारविन्दराज्या ज्यायः क्रमकमलावलीं दधत्या।
सदृशैरिति सङ्गतं प्रशस्यं, कथितं सन्तु शिवाय ते जिनेन्द्राः ।।२।।

कषायतापार्दितजन्तुनिर्वृतिं करोति यो जैन मुखाम्बुदोद्गतः ।
स शुक्रमासोद्भववृष्टिसन्निभो दधातु तुष्टिं मयि विस्तरो गिराम् ।।३।।

इति श्री वीरस्तुतिः।।

अवचूरिः- वर्धमानाय नमोस्तु, किं लक्षणाय वर्धमानाय?- कर्म्मणा सह स्पर्धमानाय, पुनः किंलक्षणाय? तत्कर्म (तस्य कर्मणः) जयादऽवाप्तमोक्षाय, पुनः किंविशिष्टाय?- परोक्षायादृष्टाय, केषां?- कुर्तीर्थिनां मिथ्यात्विनाम् ।।१।।

ते जिनेन्द्राः शिवाय मोक्षाय सन्तु, ते के? - येषां विकचारविन्दराज्या विकस्वर चरण-कमलसंतत्येति कथितं,किं कुर्वन्त्या?- ज्यायःक्रमकमलावलीं पूज्यां पाद-कमलश्रेणिं दधत्या, किं कथितं?- सदृशैः सह-सङ्गतं-मिलितं प्रशस्यं-शुभमिति कथितम्।।२।।

स गिरां विस्तरो मयि विषये तुष्टिं संतोषं दधातु, स कः?-यः कषायतापार्दितजन्तु-निर्वृतिं करोति,कषाय एव तापः कषायतापः, कषायतापेनाऽर्दिताः पीडिता जन्तवः कषायतापार्दितजन्तवः, कषायतापार्दितजन्तूनां निर्वृतिं सुखं, तां करोति, किं लक्षणो यः? - जैनमुखाम्बुदोद्गतः- सः शुक्रमासो ज्येष्ठमासस्तस्मादुद्भवा या वृष्टिस्तत्सन्निभः ।।३।।

इति श्री वीरस्तुतेरवचूरिः समाप्ता।

# विशाललोचन स्तुतिः सावचूरिः

– साध्वीजीश्रीदिव्यदर्शनाश्रीः

विशाललोचनदलं प्रोद्यद्दन्तांशुकेसरम् ।
प्रातर् वीरजिनेन्द्रस्य मुखपद्मं पुनातु वः ।।१।।

येषामभिषेककर्म कृत्वा मत्ता हर्षभरात् सुखं सुरेन्द्राः ।
तृणमपि गणयन्ति नैव नाकं, प्रातः सन्तु शिवाय ते जिनेन्द्राः ।।२।।

कलङ्कनिर्मुक्तममुक्तपूर्णतं, कुतर्कराहुग्रसनं सदोदयम् ।
अपूर्वचन्द्रं जिनचन्द्रभाषितं दिनागमे नौमि, बुधैर्नमस्कृतम् ।।३।।

अवचूरिः– अथ प्राभातिकवीरस्तुतिविवरणमाह–वीरजिनेन्द्रमुखकमलं, प्रातः प्रभातकाले, वो युष्मान् पुनातु–रक्षतु, किं विशिष्टं मुखकमलं?– विशालानि(विशाले)–निस्तीर्णे लोचने, ते एव दलानि–पत्राणि यत्र, प्रोद्यन्तः–दीप्यमाना ये दन्तास्तस्यांशवः–किरणाः, तानि एव केसराणि यत्र ।।१।।

ते जिनेन्द्राः प्रातः शिवाय सन्तु, ते के ?– सुरेन्द्राः येषामभिषेकं स्नानकर्म कृत्वा, नाकं–देवलोकं तृणमपि नैव गणयन्ति, न मन्यन्ते, कथं?– सुखं यथाभवति, सुखं यथा स्यात् तथा, किं लक्षणाः सुरेन्द्राः ? मत्ताः, कस्मात्? उत्पन्नहर्षभरात् ।।२।।

अहं जिनचन्द्रभाषितं सिद्धान्तं नौमि, कदा?–दिनागमे प्रभातकाले, किंलक्षणं जिनचन्द्रभाषितं?–अपूर्वचन्द्रं, पुनः किंलक्षणं जिनेन्द्रभाषितं? कलङ्क–निर्मुक्तं–कलङ्केन विरहितं, चन्द्रः सकलङ्को भवति, पुनः किं विशिष्टं जिनेन्द्रभाषितं?–अमुक्त पूर्णतं,–द्वितीयचन्द्रस्तु पूर्णतां मुञ्चति कुत्सितानि यानि तर्काणि विचारणानि, तद्रूपो राहुः (तस्य ग्रसनं यस्य स तद् तथा सदा नित्यं उदयः यस्य तद्)

**इति श्री विशाललोचनटीका संपूर्णा ।**

# 'चउक्क्साय' सावचूरि.

– सं. साध्वीजीश्रीमृगेन्द्रजयाश्रीः

।। भले मींडु।। चउक्कसाय पडिमल्लुल्लूरणू। दुज्जय मयणबाण मुसुमूरणू।
सरसपियंगुवन्नु गयगामिउ। जयउ पासु भुवणत्तय सामिउ ।।१।।

जसु तणुकंति कडप्पसिणिद्धउ। सोहइ फणिमणिकिरणालद्धउ।
नं नव जलहर तडिल्लय लंछिउ। सो जिणु पासु पयच्छउ वंच्छिउं ।।२।।

अव०–चउक्क० भुवनत्रयस्वामी पार्श्वो जयतु, किंलक्षणः पार्श्वः?– चतुष्कषाय प्रतिमल्लोल्लूरणः चत्वारः कषायास्ते एव प्रतिमल्लास्तेषां उल्लूरणः उच्छेदकः। 'छिदे दुहाव–णिच्छलल्–णिज्झोड–णिव्वर–णिल्लूर–लूराः प्राकृत (सि.हेम. ८/४/१२४ तमेन) सूत्रेण उत्पूर्वस्य छिदे र्धातोर्लूर इत्यादेशः। पुनः किं० दुर्ज्जयमदनबाणमुसुमूरणः। दुर्ज्जयो यो मदनः कंदर्पस्तस्य बाणाः। –

दिट्ठीय दिट्ठिपसरो, पसरेणरईरईय सब्भावो ।
सब्भावेण य णेहो, पंच य बाणा अणंगस्स ।।१।। एतद्रूपाः तेषां मुसुमूरणो भञ्जकः।

भञ्जेः– वेमय–मुसुमूर–मूर–सूर–सूड–विर–पविरंज–करंज–नीरंजाः(मि.हे.–८/४/१०६ तमेन) सूत्रेण भञ्जेर्धातोर्मुसुमूरणेत्यादि आदेशः। पुनः किं० सरसप्रियंगुवर्णः सरसः स्निग्धो यः प्रियंगुर्वृक्षः, तेन सदृशो वर्णो यस्य स, पुनः किं० –गजगामी– गज इव गमनं यस्य स ।।१।।
अव०– जसु ० स पार्श्वजिनो वाञ्छितं प्रयच्छतु–ददातु, स कः?– यस्य तनुकान्तेः–कडप्पो–समूहः शोभते। उक्तं देश्यां–निकरे कडप्प–कइअंका कइयंकसइ कुक्कुरुडा(देशीनाममाला–२/१८७) इति, किं०– लक्षणः? स्निग्धः, पुनः किं लक्षणः? = फणिमणिकिरणालद्धउ। फणी धरणेन्द्रस्तस्य मणयस्तेषां किरणास्तैराप्तोपलब्धः–व्याप्तः, पुनः कि०–नं इति इवार्थे, उक्तं अपभ्रंशे (सि.हे.८/४/४४४) इवार्थे नं नउ, नाइ, नावइ, जणि–जणवः (इति तेन नमिति) उत्प्रेक्षते, नवजलधरः नवीनो मेघः। तडिल्लतालाञ्छितः। तडिल्लता, विद्युल्लता तयाचिह्नितः।।२।। इति चउक्कसायावचूरिः।।

* * *

## विभाग : २

# अर्वाचीनकृतयः

## खण्ड : २ यशोप्रज्ञादर्शनम्

(तर्जः शरणम्..... शरणम्.....)

शरणम् शरणम्,
यशोविजयगुरुचरणम्.....१ शरणम्.....शरणम्.....

कृतवादिविजयं गुरुनयविजयम्,
भवजलनिधि तरणम्.....२ शरणम्.....शरणम्.....

सद्गुणसारं, भव्यजीवाधारम्,
आनन्दकरं स्मरणम्.....३ शरणम्.....शरणम्.....

सन्मतिकरं, नामगुणकरं,
परमश्रेयस्करणम्.....४ शरणम्.....शरणम्.....

अज्ञानहरा, वाङ्मनोहरा,
ययाऽऽत्मशुद्धिवरणम्.....५ शरणम्.....शरणम्.....

रागं द्वेषं, पुष्णाति न लेशम्,
वाङ्मुक्तिरमाभरणम्.....६ शरणम्.....शरणम्.....

यस्य प्रणमनम् पापदवशमनम्,
पुण्यपुञ्जधरणम्......७ शरणम्.....शरणम्.....

यस्य गुणकथनम् सर्वदुःखमथनम्,
साम्यसुधाऽऽचमनम्.....८ शरणम्.....शरणम्.....

सद्गुणरत्नाकरं, परमपदाऽऽदरम्,
''श्रेयोदर्शन''निर्झरणम्.....९ शरणम्.....शरणम्.....

# ।। परमज्योतिः पञ्चविंशतिका ।।

– आचार्य श्रीविजयकल्याणबोधिसूरिः

परमज्योतिषोऽनुभावान्तरमप्याहुः–

**परमज्योतिषः स्पर्शा - दपरं ज्योतिरेधते।**
**यथा सूर्यकरस्पर्शात्, सूर्यकान्तस्थितोऽनलः ।।६।।**

भवति हि प्रादुर्भूतपरमज्योतिषां योगिनां साचिव्यादितरेषामपि योग्यानां तत्प्रादुर्भाव इति न किमप्यत्र चित्रम्। अभिहितञ्चैतदेव तत्त्वमुपनिषत्सु प्रकारान्तरेण–

ॐ पूर्णमदः पूर्णमिदं, पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय, पूर्णमेवावशिष्यते।।

– इति (प्रभूतेषूपनिषत्सु)

सोऽयं भगवदनुग्रहादिपदप्रतिपाद्यः परमज्योतिःस्पर्शः, यमवाप्य कृतार्थतां व्रजति विनेयसत्त्वविसरः, नातोऽपि परमः पारम्यप्राप्त्युपायः कृत्स्नेऽपि जगति,

तत्त्वतस्तद्धीन[१]स्याप्यभावादिति निपुणं निभालनीयम्।

अथ परमज्योतिष एव माहात्म्यं दृढयन्ति–

**पश्यन्न परमं ज्योति-र्विवेकाद्रेः पतत्यधः।**
**परमं ज्योतिरन्विच्छ-न्नाविवेके निमज्जति।।७।।**

विवेकाचलाधिरोहणस्य तदाश्रयकावस्थितेश्च परमज्योतिसम्प्रेक्षणैकयोनित्वात्। तदीक्षणैकजीवनो हि विवेकः, तदुपरमे तदुपरतेरध्यक्षसिद्धत्वादित्याकूतम्। ननु च मा भूद् विवेकः, को दोष इति चेत्? को नेत्युच्यताम्, सर्वेषामपि दोषाणां विवेकविगलनैकोत्थानत्वात्। अतो यतनीयं परमज्योतिषि विवेकार्थिभिः, एवमेव परमार्थतदर्थित्वसिद्धेरिति।

(क्रमशः)

---

१) यथोक्तमन्यत्र–समेन हि स्यादुपमाभिधानं, न्यूनोऽपि ते नास्ति कुतः समानः–इति (सिद्धसेनीद्वात्रिंशिकायाम्)

# ।। वृत्तं यशोविजयवाचकपुङ्गवानाम्।।

– पंन्यासश्रीसम्यग्दर्शनविजयो गणी

## द्वितीयस्तबकः

परम श्रद्धेयवाचकवर्याणामप्रतीमं चरितं सांप्रतं कुत्रचिदपि न मिलति, तेषां ग्रन्थाभ्यासोत्पन्न–वचनानुरागेण, 'अयस्कान्तेनाऽयोवत्' तत्सद्गुणगणभावितचित्तेन, मन्दमतिनाऽपि मयाऽयं प्रयासः प्रारब्धः।

अथ नयविजयवाचकवराः मासकल्पं कृत्वा कनोडानगराद् विहृतवन्तः। गुरुवरैः सार्धं पितृभ्यां समर्पितो जसवन्तोऽपि विहृतवान्। गुरुनिश्रायां स ज्ञानाऽभ्यासे तल्लीनो जातः। ज्ञानकलायां गुरुवरास्तु साक्षिमात्रमेवाऽभवन्। सहजप्रतिभाप्राग्भारप्रवरेण तेन प्राथमिकं सर्वं ज्ञानमात्मसात् कृतम्। स्वाध्यायसिंधु मथनोत्पन्नवैराग्याऽमृतस्नातस्य तस्यात्मा परमविमलोऽभवत्। बालोऽपि सोऽबालबोधेन बृहस्पतिबुद्धिमप्यभिभवति स्म। सर्वधर्मानुष्ठानेषु दत्तचित्तःस ज्ञान–क्रियाभ्यां गोरीगंगाभ्यां शङकर इव व्यराजत। विभावेभ्यो विषयेभ्यश्च विमुखीभूय सोऽन्तर्मुखः सञ्जातः। तस्य सर्मपणं, वैराग्यं, धर्मदाढर्यञ्च निरीक्ष्य पुनः पुनः संयमयोग्यताञ्च परीक्ष्य गुरुभगवद्भिः तस्य दीक्षादानेऽनुज्ञा दत्ता। प्रागपि संयमसुन्दरीपणिग्रहणोत्कमनाः स तदा तदनुज्ञां श्रुत्वा नितरां प्रसन्नस्वान्तः संजातः। गुरुणा तत्पितरौ सामहूतौ। प्रोक्तौ च–भवत्तनूजः दीक्षायै सुयोग्यः सुसज्जश्चाऽस्ति। सांप्रतं असौ जसवन्तः रागिणं प्रति विरागी, विरागिणं प्रति च अनुरागी सञ्जातोऽस्ति। अतो मन्येऽहं यदस्य संयमदानाय विलम्बोऽनुचितः। तत्रभवन्तौ भवन्तौ महाभाग्यवन्तौ ययोः सुतरत्नं महाप्रभावकः शासनप्रद्योतको भविष्यति, एतादृक्समर्थपुत्ररत्नं श्रीजिनशासनसेवायां समर्प्य भवद्भ्यां महान लाभोऽर्जितः। इदृशं गुरुवचनं श्रुत्वा हर्षभाजौ तौ स्वं धन्यभाजम्मयेताम्। गुरुणा पुनरुक्तं यदी भवन्तावनुमन्येतं तर्ह्यस्य दीक्षामहोत्सवोऽणहिल्लपुरपत्तने कर्त्तर्व्यः। गूर्जरराजधान्यां कृतः स महाशासनप्रभावनकारी भविष्यति। तत्पितृभ्यामनुमतश्च सः। इतः श्रीअणहिल्लपुरपत्तनमहाजनेनाऽपि सादरं साग्रहं प्रार्थितौ तौ यदुत–शासनरत्न–जसवन्तस्य दीक्षामहोत्सवस्य लाभोऽस्मच्छ्रीसङ्घायैव देयः। तेषामनिवर्त्यनिर्बन्धं ज्ञात्वा स्वीकृतः स प्रस्तावस्ताभ्याम्। प्रमोदभरान्वितेत श्रीपत्तनसङ्घेनाऽपि तन्ममहोत्सवः प्रारब्धः तत्र श्रीजिनदेवकुलानि विकचषड्ऋतुजपुष्पनिचयैः सौन्दर्येण, सौरभेण च देवारामशोभामधारयन्तीव, साधुवसतयः निरंतर, श्राद्धजनगमनागमनैः, सत्कारसन्मानैः देवसभां पराभवन्त्य इव, तत्र

विविधभूषाभूषितश्राद्धनरनार्यः, देवदेवीरपि विस्मारयतीव तेन तत्पत्तनं स्वर्गसमानं सञ्जातम्। येन स दीक्षोत्सवो दृष्टः स धन्यः।

निखिलं पत्तनं महोत्सवाद्वैतं सञ्जातम्। अथ शुभे लग्ने शुभे समये श्रीनयविजयगुरुभिःयावज्जीव सामायिक व्रतोच्चारणपूर्वं प्रदतं साधुव्रतं तस्य। तत्समये आनन्दाऽऽतोद्यवृन्दतुमुलमयं सञ्जातं तत्पत्तनम्। जसवन्तस्य वेशपरावर्तनमिव नामपरावर्त्तनमपि समभवत्। तदा साधुवेषेण जसवन्तः जसवन्तेन च साधुवेषो मिथः स्पर्धया इव शोभते स्म।

अथ जसवन्तस्य श्रीनयविजयवाचकशिष्यत्वेन **''श्री यशोविजय''** इति नाम तदा सोल्लासेन महाजनेन समुद्घोषितम्। श्रीनूतनदीक्षितमुनौ स्थानं संप्राप्य ''यशसा स्व-परशासने विजयो यस्य 'इति भाविभावरहस्यं सूचयन्निव शुशुभेतराम्। (क्रमशः)

धर्मे धर्मसामग्रयां च महारागः,
स एव
ग्रन्थिभेदस्यापूर्वकरणमस्ति ।।

## विभाग : २

# अर्वाचीनकृतयः

## खण्ड : ३

## सूरिरामचन्द्रदीक्षाशताब्दीभावाञ्जलिः

(तर्जः – चरण की शरण ग्रहुं.....)

चरणशरणकरणम् रामगुरो!
तव चरणशरणकरणम् मम तद् भवतरणम्.....
रामगुरो!..... १

भव दुःखहरणं शिवसुखकरणं, समतासुखभरणम्,
मोहराजभटबन्दिकरणम्, मुक्तिवधूवरणम्.....
रामगुरो.....! २

विषय–कषायदुःख प्रशमनम्, पापतापहरणम्,
यस्य सुगुणसुधारसपानं, शमसुखनिर्झरणम्.....
रामगुरो.....! ३

भव्यकेकिप्रीतिजलधारम्, शासनसूत्रधारम्,
सौजन्यसारं श्रीगुरुचरणं, समतासमाधिधरणम्.....
रामगुरो.....! ४

''श्रेयः'' परम प्रासाद सोपानं, सत्प्रज्ञाऽऽभरणम्,
''सम्यग्दर्शन''रत्नं देहि, मम गुरो! भवतरणम्.....
रामगुरो.....! ५



# गुरुगुणत्थवकुलगम्

– आचार्यश्रीविजयवीरशेखरसूरिः

णं वंदे प्रेमसूरिं पहिअसुचरणं दाणसूरिस्स सीसं।
पट्टव्वोमंसुमालिं रसतुरगमिए वीरपट्टे णिविट्ठं।
बद्धो बालप्पबुद्ध–प्पहुडिमुणिगणो पेमपासेहि जेणं।
किं लज्जाए अदिस्सो मइविहवजिओ जस्स देवाण सूरी ।।१।। सद्धरा (स्रग्धरा)

जो वच्छल्लणिही णिरीहजलही चारित्तचूडामणी।
जं दट्ठुं पि मुयं अइन्ति परमं पाएण दुट्ठा विही।
जेणं संजमरज्जुणा भविगणो संसारकूबुद्धयो।
जस्साणेगगुणालयस्स सिहरे लोगा गुणालिच्छुणो।। ।।२।। सद्दुलविक्किडिअं

जत्तो साहुगणावगा पयडिआ भव्वाहकिट्टावहा।
जस्सुत्ती अविलंबसिद्धिफलया एगंत खेमंकरी।
जस्सिं संकइ ही जणो गुरुवरो मत्तो वि किं गोयमो।
लोए ओअरिओ दुहाकुलकुलं दट्ठूण बुद्धो जहा ।।३।। (स.वि.) शा.वि.

सो सिद्धंतमहोअही मुणिवई मे दाउ सिद्धिं णरं।
तं वंदेह खमाणिहाणसमयापेऊसवारांणिहिं।
तेणं हं पि जडो भिसं उवकयो चारित्तदाणारुणा।
तस्साहिट्ठपदाणकप्पतरुणो भावुल्लसेणं णमो ।।४।। (स.वि.) शा.वि.

तत्तो पूअसुसंजमा भविगणो पावेउ इट्ठं लहं।
तस्संही फरिसन्ति भत्तिणिहरा भव्वा सिवाकंखिणो।
तस्सिं मंदसमाहिदाणकुसले उक्किट्ठचायालये।
कम्मगंथरहस्सचारचउरे थोउं गुणा को अलं ।।५।। स.वि.(शा.वि.)

सूरीसो धारए जो तिसयमुणिजुअं गच्छमेकायवत्तं।
भूवालाणं अहीसो जह छदलमहिं रज्जमेकायवत्तं।
जोग्गो जो सूरिठाणो सुविइअगुरुणा णिच्छमाणो विणत्थो।
सो पुज्जो पेमसूरी हवउ सिवियरो धीरलोगत्तरेहो ।।६।। सद्धरा (स्रग्धरा)

णेगा सुद्धमवेसगा अदुरुआ वेरग्गवारीसरा।
जीअत्थुग्गतवा सुसंजमरया सिद्धंतपारं गया।
विज्जादी उवएसदाणकुसला उक्किट्ठचायासिआ।
गच्छे जस्स मुणी जयेउ तिजगे सो पेमसूरी सया ।।७।। स.वि.(शा.वि.)

हा हा सिद्धंतवद्धी सपरहिअयरो सासणब्भेगसूरो।
हा हा वेरग्गणिग्घोसुविहिअमुणिणो बड्डुगच्छस्स णेत्ता।
हा हा वच्छल्लमुत्ती कयजणकरुणो संघकोसल्लधामं।
हा हा णिस्सामिणो णें चइअ समणिही तं गओ कत्थ णाहो ।।८।। सद्धरा (स्रग्धरा)

जीवः स्थिरीभवितुमिच्छेत्, तथापि यत्र तन्न शक्यं,
शक्यश्च पदे पदे यत्र च परिस्थितिः परिवर्त्तः-
अयमेव संसारः।।

# यावच्चन्द्र-दिवाकरौ जयतु सः श्रीप्रेमसूरीश्वरः

– गच्छाधिपतिआचार्यश्रीविजयपुण्यपालसूरिः

त्राता योऽस्मिन् सुरेन्द्रै र्मनुजपतिगणैः पूज्यमानोऽतिभक्त्या,
विश्वे देवाधिदेवो विशदगुणनिधि र्ध्वस्तमोहः स्वशक्त्या।
कुष्टातङ्कस्य पीडाऽभयसुरसुधियश्च व्यनाशि स्वशक्त्या
भूयास्सः 'स्तम्भनारव्यो' द्विचरमजिनपो गोचरो मे प्रणत्याः 'स्त्रग्धरा'।।१।।

मिथ्यात्व-ध्वान्त चक्रोद्भवकुमतमतौ केशरिक्रूरदृष्टे !
विश्वाम्भोजैकभानु-श्रमणमतमतामिन्दुरुक्सौम्यदृष्टे !
अर्हद्वक्त्राब्जसूते ! हरतु मम तमः विश्वविख्यातकीर्ते !
वीणाङ्के ! वाग् ! भवाब्धौ 'भवविरहवरं' देहि मह्यं भवार्त्तेः 'स्त्रग्धरा'।।२।।

बाल्ये सिद्धान्तवार्धेरतिशयमथनात् प्राप्तनिर्वेदरत्नस्-
तारुण्ये दुर्जयाक्ष-द्विपततिदलने बद्धयत्नो मृगेन्द्रः।
वार्धक्येऽप्यप्रमत्तः स्फुरदुरुरुचिरद्युट् सुचारित्ररत्नो-
योऽराजद् विश्वविश्वे चरणगुनिधिव्योम्नि राजद्द्युरत्नः 'स्त्रग्धरा'।।३।।

दूरापास्त-समस्त-दोषमुनिपैः संसेव्यपादद्वयो,-
यस्यान्तःकरणे व्यभाच्च सततं श्रीवीर-दानद्वयम्।
विश्वानन्दविधायि-तायि-वसुधालङ्कारहारोपमो-
मोहावेगविषोर्मिमूर्च्छितजने पीयूषधारोपमः शार्दूलविक्रीडितम् ।।४।।

येनाऽपश्चिमशासने व्रतिपतौ शार्दूलविक्रीडितं,
चारित्रे विलसदक्षमादिक-गुणैः शार्दूलविक्रीडितम्।
हृद्रोगादिगणै र्यदीयसुतनौ शार्दूलविक्रीडितं,
संसारोद्भव-राग-दन्ति-दलने शार्दूलविक्रीडितम् शार्दूलविक्रीडितम् ।।५।।

मर्त्याऽमर्त्य-सुदुर्जये रतिपतौ यो नीलकण्ठायते,
विश्वेऽसंख्य-गुणाप्त-भूति-वसुतो यो नीलकण्ठायते।
पीताऽऽपत्तिविषोऽपि फुल्लवदनो यो नीलकण्ठायते
आज्ञाऽमर्त्यनदीं जिनस्य विवहन् यो नीलकण्ठायते शार्दूलविक्रीडितम् ।।६।।

जाड्याऽन्धस्य विनाशने तनुभृतां यः पद्मपाणीयते,
पूर्वोपार्जितपङ्कशोषण-विधौ यः पद्मपाणीयते।
साधुत्व-प्रतिपक्ष-दैत्य-हनने यश्चक्रपाणीयते,
ऐश्वर्याद् भुवि सूरिराजनिचये यश्चक्रपाणीयते शार्दूलविक्रीडितम् ।।७।।

मित्राऽमित्रजने कृपाऽमृतकराद् विश्वे शशाङ्कायते,
धर्मस्यैव निषेवनान्निजहिते यश्च वृषाङ्कायते।
यः सूरीन्द्रेरजातशत्रुरवनौ ख्यातो विपक्षोज्वलो,
ब्रह्माऽख्यानलकुण्डदग्धविषयासक्तिः सुवर्णोज्वलः शार्दूलविक्रीडितम् ।।८।।

एतद्भारत-भूमि-सुव्रतिपति र्यः कल्पसालायते,
भव्यानां हृदयेऽतिनिर्मलतरे यः पद्ममालायते।
उद्यन्मोहमहानलेऽत्र भुवने यो मेघमालायते
धात्र्यां प्राज्यगुणोत्तमाऽऽस्यसुधियां मौलीषु मालायते. शार्दूलविक्रीडितम् ।।९।।

दीपाः कोटिमितान् यथा गृहमणीन् प्रज्वालयन्ति क्षितौ,
पथ्याऽपथ्यविपाकवस्तुविचयं संसूचयन्ति क्षितौ।
यस्माद् दीप्तदशेन्धनाः सुमुनयः संदर्शयन्ति क्षितौ
तत्त्वाऽतत्वगणं तथाऽव्ययपदं संव्याहरन्ति क्षितौ शार्दूलविक्रीडितम् ।।१०।।

कर्मग्रन्थविचारणे सुनिपुणः सिद्धान्तपाथोनिधिर्-
विश्वैकाहितमोहमल्लविजयी, कारुण्य-वारांनिधिः।
सूरीशस्सततोदयर्षि-गणभृत् विश्वे गुणाधीश्वरो-
'यावच्चन्द्र-दिवाकरौ जयतु सः श्री प्रेमसूरीश्वरः' 'नवभि कलापकम्' ।।११।।

# श्रीप्रेमशतकम्

– आचार्यश्रीविजयमुक्तिप्रभसूरिः

पञ्चम्यां च, ग्रहशशिवियद् द्वयब्दकृष्णोर्जमासे,
रोगस्तीव्रः, समजनि महान्, प्रेमसूरेः शरीरे।
राजस्थाने, विहरति तदा, 'हार्ट एटेक' नामा,
दोषज्ञानां स खलु निखिलैर् नो प्रयातः प्रयत्नैः ॥८६॥

स्वीयैर् दण्डै, रचितशिबिकामध्यभागेऽधिरूढं,
स्वीये स्कन्धे, निजगुरुवरं, भक्तिमान् शिष्यवर्गः।
धृत्वाशक्तं, खलु विहरते, संहरन् स्वीयपापं,
धावन्ति स्माहमहमिकया, साधवस्तेऽनुसाधु ॥८७॥

वर्षे द्वयक्ष्यभ्र–यमलमिते, पौर्णमास्यां तिथौ च ;
प्रेमाचार्यप्रवरगुरुसत्सन्निधौ तस्य साधोः।
नूत्नग्रन्थद्वयमथ समुद्घाटितं श्राद्धवर्यैर्–
हस्त्यारूढं, कृतमप्रतिमं, सोत्सवं जैनपुर्याम् ॥८८॥

विश्व–श्रोत्रा–ऽभ्रपथ–युग संवत्सरे स्तम्भतीर्थे
वार्धक्येऽपि, श्लथितवपुभिः, सूरिभिः सञ्चरद्भिः।
सार्धं स्वीयैर् वरपरिकरैः, पावनं तच् चरित्वा,
चातुर्मासं, विहितमथ तैस् तत्र सङ्घाग्रहेण ॥८९॥

वर्षावासे, गुरुवरवपुर् नैकशश्चान्तराले,
रोगव्रातं गतमपि पुनर् नोऽसमाधिं गतः सः।
साधून् सर्वानिति कथितवान्, साधवो वः सकाशा–
दाशासेऽहं, चरमसमये, सर्वथान्तःसमाधिम् ॥९०॥

दुःखोत्पादां, निजवरगुरोरार्त्तवार्तां विदित्वा
तत्रागच्छन्निजगुरुवरे, भक्तिमान् सूरिरामः।
तूर्णं वेद-द्वययुग-युगे, वत्सरे मोहमय्यां-
मासे माघे, मिलनमभवच्छिष्यगुर्वोरपूर्वम् ।।९१।।

स्वास्थ्येऽस्वस्थे, ह्यपि गुरुवरः, स्वस्थचित्तोऽप्रमत्तः,
साधोः सेवालवमपि कदा, स्वेच्छया नैव गृह्णन्।
कर्तुं सर्वं, क्षतिविरहितं, शोधयन् कर्मशास्त्रं,
ज्ञानध्याने, सततनिरतः, सर्वदासीत् प्रसन्नः ।।९२।।

आधौ व्याधौ, निरवधि सदा, साधयन्तः समाधिं,
सूरिशास् तेऽप्रतिमप्रतिभायुक्तशिष्येन सार्धम्।
वर्षावासं, निवसितुमथो, सङ्घविज्ञप्तिवश्या-
श्चातुर्मासं, तदपि च परं, तत्र निर्णीतवन्तः ।।९३।।

हा ! वैशाखे, गुरुरगमदस्वस्थतां कालरात्रौ,
तूर्णं तत्र, त्वरितगतिमान्, सङ्गतः शिष्यवृन्दः।
सङ्घोऽप्येवं, सपदि मिलितस् तद् विदित्वैव वृत्तं,
त्यक्त्वा निद्रामुप निजगुरुं रामसूरिर्जगामः ।।९४।।

सर्वानेवं, कथितमथ मां, कारयध्वं समाधिं,
प्राप्यात्यन्तं प्रथमनिजसच्छिष्यवक्त्रात् समाधिं।
स्वर्यातास्ते, परमगुरवो, वीरनाम स्मरन्तः
को जानीते, किमिह भविता, कालसङ्केत एषः ।।९५।।

राजस्थानं, रुदितमहहा !, गूर्जरा अर्त्तिमाप्ताः
सौराष्ट्रीयाः, शिथिलवपुषो, हा! महाराष्ट्रदेशः।
साधोः सङ्घो, गुरुविरहतः, शोकमाप्नोत् समग्रो,
ध्वान्तध्वस्तं, खलु जगदहो, प्रेमभानौ प्रयाते ।।९६।।

सन्देशोऽयं, पवनजवतो, यातवान् सर्वदेशं,
दुःखग्रस्ता, अपि हृदयसद्भावतस्तत्र याताः।
सङ्घा नैके, गुरवरगुणासक्तभक्ता गृहीत्वा,
देहं तेषां, जयजयरवैर् निर्गता निर्गताश्रु ।।९७।।

अग्नेर्दाहः, कृत इति गुरोरेकत्रिंशद्सहस्त्रैः
सद्रूप्याणां, द्रवितहृदयाद्, भक्तवर्गेण वर्यः।
लक्ष्मोन्मानं, द्रविणमखिलं, तन्निमित्तेन जातं,
तस्मात् संस्थापितमनुगुरु स्मारकं भाति तत्र ॥९८॥

अद्याप्येवं, वदति विदुषां, वृन्दमेतान् स्मरन्तो,
नो यातास्ते, क्वचिदपि सदा, सन्ति सन्तो हि चित्ते।
अप्रत्यक्षा, अपि गुरुवरा, भान्ति प्रत्यक्षमेव,
**कीर्तेर् देहो, भवति महतां, स्थायि नित्यं समन्तात्** ॥९९॥

यावच्चन्द्रं, जगति जयतात्, कीर्त्तिदेहात् सदेहो,
यो विख्यातः, प्रकटचरणाचारसञ्चारहारी।
वात्सल्याब्धिर् निरवधिगुणो, देहधारी गुरुर्यो,
यस्याकार्षं शुभदशतकं, स प्रभुः प्रेमसूरिः ॥१००॥

इति प्रेमशतकम्॥

॥ अथ प्रशस्तिः॥

जैनेन्द्रशासननभोद्युतिकृद्दिनेश-
श्रीप्रेमसूरिवरवर्यविनेयरत्नः।
सूरीश्वरो नवरविर्गुरु 'रामचन्द्रः'
संराजते सकलभक्तचकोरचन्द्रः ॥१॥

(वसन्ततिलका)

धर्मोपदेशनपटुः प्रथितस्तदीयः,
पन्न्यासमुक्तिविजयो गणिराट् सुशिष्यः।
तच्छिष्यवर्यजयकुञ्जरनामधारी
राराजते मम पिता गुरुभावधारी ॥२॥

शैक्षेन तस्य वरकार्तिकशुक्लपक्षे ,
वर्षे व्रत-द्वय-वियद्-यमले चतुर्थ्याम्।
मुक्तिप्रभेण मुनिना खलु स्तम्भतीर्थे
श्रीप्रेमसूरिशतकं विहितं हिताय ॥३॥

**॥ सम्पूर्णम् ॥**

# रामचन्द्रसूरि स्तुत्यष्टकम्

– आचार्यश्रीविजयमुक्तिप्रभसूरिः

**यः** सम्राडिव राजते रजनिराड्–रोचिःस्फुरत्सद्गुणः
प्रेमाचार्यगुरो–र्गरिष्ठगुरुतां, साकारयन् सर्वतः।
विश्वव्याप्तविशिष्टकीर्त्तिकलशो,व्याख्यानवाचस्पतिः
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ।।१।। शा.वि.

**यं** नैके प्रणमन्ति यान्ति सुगुणाः, सन्मार्गिणः स्वाश्रयं
गायन्ति प्रथयन्ति यं हि यतयः, कृत्वा नतिं भावतः।
सम्यग्दर्शनदर्शिनं जिनमत–श्रद्धोल्लसत्सद्गिरा
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ।।२।।

**येन** प्राप्य परं परं पदविदं, श्रीप्रेमसूरिं गुरुं।
प्रव्रज्या भवसन्ततिक्षयकरी, क्षेमंकरी स्वीकृता।
दत्ता येन पुनर्गणाय गणनातीताय मोक्षार्थिनां।
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ।।३।।

**यस्मै** प्रेमगुरुः स्वयं शुभदिने, प्रादात् तृतीयं पदं
गच्छं स्वच्छमपि प्रदाय कृतवान्, गच्छाधिपं स्वेच्छया।
नैकोपाधय इत्युपाधिविमुचे, संघैः प्रदत्ताः पुनः।
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ।।४।।

**यस्माद्** वाणीसुधाम्बुधेर्विगलितो, वाग्बिन्दुरेको ह्यलं
रागोत्तुङ्ग–शिखोज्वलद्धुतभुजः, शान्त्यै विरागार्थिने।
यस्माद् दूरमगादनेकभविक–स्वान्तान्धकारं महत्
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ।।५।।

आबाल्यादपि **यस्य** बुद्धिविभवो, वर्ण्योऽप्यवर्ण्योऽभवद्
यं दृष्ट्वैव निजाङ्गुलिं निजमुखे, न्यस्यन्त्यहोस्विज्जनः।
श्रुत्वा यद्वचनं हि केचन जनाः, शिष्यत्वमाप्ता यतः
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ॥६॥

**यस्मिन्** शासनपक्षपातिसुगुरौ, गाम्भीर्यमब्धेर्निभं
यस्मिन् दुर्मतदुस्तमःक्षयकरे, तेजोऽर्कभासां समम्।
यस्मिन् शास्त्रविरोधरोधकुशले, शास्त्रावबोधो महान्
सूरिः श्रीयुतरामचन्द्रविजयो, गच्छाधिराड् राजतात् ॥७॥

**भो** ! व्याख्यानविशारद ! प्रथितवाग्-दिव्यप्रभाव ! प्रभो !
प्रोत्कृष्टप्रतिभा-प्रभाऽप्रतिहतार्हद्वाणि ! वाणीप्रभो !।
मुक्तिस्त्रीमिलनोत्सुकैकसुमनस् ! त्वत्संस्तवात् सद्गुरो !
त्वत्सादर्ध खलु मुक्तिमेव मुनिराड्, **मुक्तिप्रभः** प्रार्थये ॥८॥

'दुःखं मम अनिष्टं सांसारिकसुखश्च सदेष्टं'
इति या वासना-स एव संसारः॥

# रामचन्द्रं गुरुराजं शरणं तं श्रये

(रागः प्रीतलडी बंधाणी रे अजित...)

– आचार्यश्रीविजयतपोरत्नसूरिः

शास्त्रनिदर्शितसत्पथविहरणनिश्चयात्,
भयसहस्रैर्युक्तिशतैरपि केनचित्।
न सत्त्वसारः शक्यश्चालयितुं प्रभुः,
रामचन्द्रं गुरुराजं शरणं तं श्रये ।।१।।

यत्करुणारसलीना यतयो लीलया,
गहनसमयगूढार्थनिरूपणकौशलम्,
आशु लभन्ते नामस्मरणाद् मर्मगं,
उपकारिवरीवस्याः सततं मानसे ।।२।।

स्मारण–वारण–प्रेरणरूपविधित्रयम्,
कर्णप्रिय–सम–कर्कशवचनमयं तथा।
प्रतिप्रेरणमनुवर्तन–सबल–विरुद्धिकम्,
चत्वार्यपि भगवँस्! त्वयि राजन्ते प्रभो!।।३।।

अनवगणयतामागो बहुलानामपि,
नोपालम्भनरूपात्प्रेरणनतोऽन्तरा।
प्रतिप्रेरणमिह शरणं शास्त्रेभ्यो विना,
सकलसमीहितकल्पतरुभ्यः संभवि ।।४।।

प्रेरणतश्चेत् स्यात् समदोषनिराकृतिः,
किं कुर्वीताऽध्ययनं शास्त्राणां तदा?।
अत एव त्वं शतशो हितशिक्षां ददत्,
स्वाध्यायरसं प्रादुष्कर्तुमनायसे ।।५।।

किं वरयशसा ख्यातः सत्पुरुषाग्रणीः,
कीर्तिरमाप्रियरमणः सौभाग्याम्बुधिः।
असत्प्रवृत्तिं स्वसुतं शृण्वन्तं पिता,
कोऽप्यविलम्बादाज्ञातो निरकासयत्?।।६।।

नहि चेत्, निखिलाश्रितहितलक्ष्याङ्कः सदा,
सार्वजनीनः करुणारसनिष्यन्दनः।
मलसम्मार्जनसक्षमवात्सल्याम्बुदः,
परमपितामहतायाः शोभाकारणम् ।।७।।

गुरुदेवस्त्वं पापं मादृशमप्यहो,
निश्रायां चेत् स्वस्यां रक्षसि पावनः।
योग्यतया मादृक्षु हि भवितव्यं खलु,
संगृह्णाति न मृतकं गम्भीरोऽम्बुधिः।।८।।

सम्प्रति गुरवो निर्मलशीलसुगन्धयः,
मार्गनिरूपणतात्त्विकसात्त्विकताधिपाः।
आश्रितचित्ताऽऽवर्जनकौशल्यान्विताः,
मृग्यन्ते शिवसाधनसोत्साहैर्जनैः ।।९।।

एतन्निष्ठात्रयसंरक्षायां त्वया,
भवभीतेन न भगवन् ! भीतिर्धार्यते।
एकोऽपि त्रय इति संचिन्त्य समाश्रिताः,
भूरिबुद्धिशुचि चरितास्त्वां शरणं यताः ।।१०।।

आधारो गुरुतत्त्वस्यैकः प्रापि मे,
निर्धारो गुरूचरणे सर्वस्यार्पणे।
उद्धारो गुरूवचनैर्भूयाद् दोषिणाम्,
अवधारो गुरूभक्तानां मम प्रेयसाम् ।।११।।

# श्री रामचन्द्रीयमहाकाव्यम्

(सर्ग : ६)

– पंन्यासश्रीमोक्षरतिविजयो गणी

अहो'ऽनुद्गतकूर्चालोऽप्यसौ गम्भीरिमावधिः।
शिक्षितैरपि दुःप्रापा, प्रतिभाऽप्रतिमास्य हि ।।५१।।

येन केन प्रकारेण, शक्तिरस्योपयोज्यते।
देशस्वतन्त्रताकार्ये, किं हि न्यूनं तदा भवेत् ।।५२।।

श्रोतृचेतःसु वार्ताः स्वाः, सहसोत्तारयत्यसौ।
इत्यस्मिन् ध्यायति सति, व्याख्यानाद् व्यरमद् व्रती ।। कलापकम्।।५३।।

यातेषु श्रोतृषु प्रीतः, श्रितः प्रशमिनोऽन्तिकम्।
प्रणम्य च प्रवक्तृणामग्रेसरमुवाच सः ।।५४।।

आङ्ग्ललोकैः स्वमाक्रान्तं, देशं पश्यथ सर्वथा।
स्वतन्त्रीकरणं तस्य, धर्मकर्मेव नास्ति किम्? ।।५५।।

युष्मत्समा महात्मानश् चेत् तत्र रसदर्शिनः।
सिद्ध्येन्निमेषमात्रेण, तत् सर्वं कर्म निश्चितम् ।।विशेषकम्।।५६।।

प्रत्युवाच वचस्वीशः, सत्यं देशोऽधुनापदि।
परं युष्मत्प्रयत्ने तु, धर्मं नोपलभामहे ।।५७।।

धर्मश्च द्रक्ष्यते तस्मिन्, कार्येऽस्माभिर् यदा तदा।
प्रार्थनां वोऽनपेक्ष्यैव, करणीयं करिष्यते ।। युग्मम्।।५८।।

वचो वचस्विनः श्रुत्वा, महासत्त्वं निरीहताम्।
धर्मैकशर्मदृष्टिं च, ध्यायं ध्यायमयात् ततः ।।५९।।

---

१) लोखण्डी पुरुष इति विख्यातः। लोहपुरुष/अयः पुरुषो वा

चतुर्मासीमिमां जैन-शासनोन्नतिकारिणीम्।
व्यतीत्य पवितुं पृथ्वीं, निर्ययुर् यतयः पुरात् ॥६०॥

क्रमाद् यतिक्षितीशानाः, श्रीदानादय ऐयरुः।
पिण्डवाडकनामानं, ग्रामं मरुविभूषणम् ॥६१॥

इमां तेऽथ मुनिप्रेमविजयस्य जनुर्-भुवम्।
कालं वार्दलसंव्याप्तव्योममण्डलमाश्रयत् ॥६२॥

सङ्क्रमकरणं नाम्ना, कर्मसिद्धान्तगुम्फितम्।
ग्रन्थमग्रन्थतात्र श्रीप्रेमगुरुर् [1]गुरूपमः ॥६३॥

तां व्यतीयुश् चतुर्मासीमन्यां च **पाडिवाह्**वये।
**महीदाह्**वे पुरे चैकां, मरौ ते मुनयः क्रमात् ॥६४॥

श्रीमान् **भगवती**लालः, सौभाग्यभाग्यभाग् यतेः।
**भुवना**दिमविजयनाम्नाभूत् प्रथमोऽनुगः ॥६५॥

विहरन्तो हरन्तोऽघं, नृणां सस्वागतोत्सवम्।
आराधनाधनाः प्रापुः, श्रीराधनपुरं पुरम् ॥६६॥

मुनेः प्रवचने पौरा, मन्त्राकृष्टा इवाहयः।
आयासुः प्रत्यहं तत्र, भूरयः सचिवादयः ॥६७॥

वाचश्च किल्बिषविषवमनीः [2]सांयतेन्दवीः।
आकर्ण्य वर्ण्यतेजस्कं, जायते स्म पुरं तदा ॥६८॥

नृणामिह प्रणीयासौ, मुक्तिमार्गगतौ मतिः।
भवोद्वेगं च वेगं च, व्यहार्षीद् गुरुभिस् ततः ॥६९॥

उज्ज्वलैर् निर्मलैर् [3]गोभिः, कुवलयं प्रबोधयन्।
चिरं विहरति स्मोर्व्यां, विभुर् व्योम्नीव भास्करः ॥७०॥

---

१) बृहस्पतितुल्यः। २) संयतेन्दोरियं सांयतेन्दवी। ३) गौः किरणं वाणी च।

क्रमादहम्मदाबादं, श्री प्रेमविजयादयः।
पुरं प्रापुः पयोवाहाः [1]पयोवाहाश्रयं पुनः ।।७१।।

गुरूक्त्या तेऽथ तत्र श्री**सिद्धिसूरी**शसन्निधौ।
विशालं विद्याशालाह्वमुपाश्रयमुपाश्रयन् ।।७२।।

छाण्याह्वां च गणिः श्रीमान्, दानर्षिर् वस्तुमैत् पुरीम्।
पूज्यश्रीविजयाचार्य**कमलेन** सुवासिताम् ।।७३।।

चातुर्मास्यां च पूर्णायां, पूज्यैः कमलसूरिभिः।
पन्न्यास**दान**विजयः, श्री**लब्धि**विजयस् तथा ।।७४।।

आचार्यपदमुच्चैरारोहयातां यतीश्वरौ।
स्वपट्टेऽस्थापयातां च, तेजसांऽशु-विधू इव ।। युग्मम्।।७५।।

इतः प्रावृड्व्यये श्रीमान्, **सिद्धि**सूरीश्वरः स्वयम्।
ददौ पन्न्यासपदवीं, **श्रीप्रेम**विजयर्षिणे ।।७६।।

दुःखरूपं सुखं दुःखफलं दुःखानुबन्धि च ।
यत्र तस्माद् भवान्मुक्तिः, सुधर्मैकवशा किल ।।७७।।

इत्यादिमुनिवाक्प्रीतपौरप्रार्थनया पुरे।
द्वितीयामपि वर्षर्तुं, व्यतीयुरत्र संयताः ।।७८।।

आकर्ण्य कर्णपीयूषं, श्रीरामवाक्यमन्वहम्।
मोक्षैकलक्षदीक्षैकपक्षं पौरं मनोऽभवत् ।।७९।।

जनो भववनभ्रान्तं, स्वमधन्यममन्यत।
गन्तुं च मुक्तिनगरीमकुण्ठमुदकण्ठत ।।८०।।

अपारसंसारमहाकूपारपारकारणम्।
व्रतमादित्सवः पौरा, अहमहमिकां व्यधुः ।।८१।।

---

१) व्योम।

आजन्म ज्ञानहीनोऽपि, जनः सम्यगबुध्यत।
संसारहेयतां मोक्षादेयतां व्रतलेयताम् ।।८२।।

मार्गानुसारितां केचिच्श्रावकत्वं च केचन।
केप्यापुर् यतितां **क्वापि, नाफला मुनिदेशना** ।। पञ्चभिः कुलकम्।।८३।।

जेसीङ्गलालसञ्ज्ञस्य, श्रेष्ठिवर्यस्य चेतसः।
श्रीरामवाक्पयःपूरै, रागो द्राङ् निरवास्यत ।।८४।।

न ह्यभिनिष्क्रमिष्यामि, प्रावृषः पूर्वमेव चेत्।
तर्ह्यस्तु नाऽथाऽनशनं, ममेति श्रेष्ठिसत्तमः ।।८५।।

गुरोरभ्यग्रमत्युग्रं, जग्राहाभिग्रहं कृती।
**यद् वा विक्रमवित्तानां, [१]लोकाग्रमपि सुग्रहम्** ।।युग्मम्।।८६।।

बहवः श्रावकास् तेन, श्रेष्ठिना जगृहुः सह।
तां प्रतिज्ञां **जनः प्रायः, सर्वोऽप्यग्रेसरानुगः** ।।८७।।

सम्प्राप्ते समये श्रेष्ठी, प्रतिज्ञां पूरयन्निजाम्।
द्वितीयोऽभून्मुनेः शिष्यः, श्रीजसविजयाह्वयः ।।८८।।

अर्हतां चार्हतानां च, भक्तौ लक्ष्मीरवर्षयत्।
महाव्रतोत्सवे श्रेष्ठी, पुष्करावर्तमेघवत् ।।८९।।

जैनं जगदयं दीक्षाक्षणः किञ्चिदकारयत्।
पूर्वकालीनप्रव्रज्यापर्वणां स्मरणं किल ।।९०।।

तरुणोऽरुणतेजस्वी, चीनुलालस् तदा मुनेः।
स्वीचकार चरणयोः, पद्मयोश् चञ्चरीकताम् ।।९१।।

चारित्रेणैव विजयश्रीर्लभ्येऽतीव दर्शयन्।
चारित्रविजय इति, मुमुक्षुः स श्रुतोऽभवत् ।।९२।।

---

१) मोक्षः।

महोत्सवेन संसार,-त्यागं श्रीसुतयोस् तयोः।
अदृष्टपूर्वमैक्षन्त, पौराः स्फारितलोचनाः ।।९३।।

दीक्षादुर्भिक्षक्षामार्हद्,-धर्मक्ष्मा साध्वभ्रस्यास्य[1]।
व्याख्यानाम्भोधारासिक्ता, भातीदानीं सौभिक्ष्येण ।।९४।। विद्युन्मालानामच्छन्दः

प्रद्योतिष्यत्यत्यन्तं द्राङ्, नूनं जैनं धर्मं व्योम।
सम्पूर्णद्योतं प्राप्यैनं, साधुं ध्वान्तारातिं नव्यम् ।।९५।।

युगेषु यातेषु परःशतेषु, हितोपकारैकरता जनानाम्।
ये केऽपि सन्तो भुवि सम्भवन्ति, तेष्वेष भात्येकतमः शमस्वः।। ।। उपजातिः ।।९६।।

हर्षप्रकर्षादिति मन्यमानैः, परैर्जनैरप्यमुमुद्यते च।
प्रशस्यते च व्रतिवासवस्य, गुणावलिः श्रीजिनशासनं च ।। कलापकम् ।।९७।।

सिद्धान्तनीरनिधिमन्थनमन्दराऽगं, सिद्धान्तवाग्विहितसंसृतिमन्द-रागम्।
सम्प्राप्य सद्गुरुमगण्यगुणं नवीनौ, स्वं संयतौ गणयतः स्म विमुक्तिसंस्थम्।।९८।।

दीक्षापुनर्भवपराय वराय पुंसे, विश्राणिता परभवे सुलभात्मनः स्यात्।
इत्यागमोक्तिपरिभावितचित्तवृत्तिः, प्रीतिं प्रभुः प्रशमिनामसमां समाप ।।वसन्ततिलका।।९९।।

* * *

**श्री जिनेश्वरभगवतां सेवा एव मङ्गलम्,**
**पूजा मङ्गलम्, उपासनापि मङ्गलम्,**
**भक्तिरपि मङ्गलम्**
**किन्तु आज्ञाधीनता तु महामङ्गलम्।**

* * *

---

१) अभ्रः = वारिदः।

इति श्रीरामचन्द्रीयमहाकाव्ये श्रीजिनवचनामृतवर्षक-भावनावनश्रीवर्धक-जिज्ञासुजनान्तःकरण-सन्तर्पक-पूज्यपादाचार्यदेव-श्रीमद्विजयरामचन्द्रसूरीश्वर-चरितवर्णनात्मके षष्ठः सर्गः।

# गुणांशं वर्णयाम्यहम्

– पंन्यासश्रीधर्मदर्शनविजयोगणी

शंखेश्वरपुराधीशं, नत्वा पार्श्वजिनेश्वरम् ।
गुरुश्रीरामचन्द्रस्य, गुणांशं वर्णयाम्यहम् ।।१।।

अनादिभवकान्तारे, जनानां शरणं गुरूः ।
उपकारततिं तस्य, वर्णयितुं शमश्च कः ।।२।।

तथाऽपि यत्कृपादृष्ट्या, प्रयत्नः सफलोऽस्तु मे ।
किं न यायाज्जनः पारं, बोहित्थेन महाम्बुधेः ।।३।।

नन्दनं किं ययौ मेरौ रामचन्द्रगुरोरहो
स्वाध्यौदार्य–गाम्भीर्य गुणौघसुमनोजितम्।।४।।

शासनरक्षणे श्रेष्ठां, यद् गुरोर्वीक्ष्य वीरतां।
शासनरक्षकः श्रेष्ठ, इति दत्तं पदं जनैः ।।५।।

दुर्भिक्षं येन दीक्षायाः वाणीवारा विनाशितम्।
यः ख्यातः शासने तस्माद् दीक्षायुगप्रवर्तकः ।।६।।

दयाब्धिसूरिणोग्रेऽयं पाथोधिश्चुलुकायते।
मन्दिरे भद्रकाल्याख्ये, येनाऽहिंसा प्रवर्तिता ।।७।।

शासनरक्षणे यस्य, दृष्ट्वा निश्चलतां गुरोः।
दूरेऽगादचलाधीशः किं हित्वा दृष्टिमज्जगत् ।।८।।

शीलेन सुरभिगात्रः, सुसंयमे सदारतः।
कुकर्मकर्तने दात्रः, सज्जनैश्च सदानतः ।।९।।

जीयाच् श्रीजिनशासनाम्बरतले, योऽपूर्व इन्दूपमः
संसारार्णववारिशोषणपरः, यो मोहनिद्रान्तकृत् ।
अर्हच्छासनशत्रुजालजलभृद्–व्रातैरनाच्छादितः
श्रीसूरीश्वरवृन्दचन्द्रविजयश्रीरामचन्द्रः प्रभुः।।१०।।

# सम्यग्ज्ञानम्

– प्रशमरक्षितविजयो मुनिः

मोक्षस्य कारणं ज्ञानं, ज्ञानी ज्ञानाद् हि पूज्यते,
मोहान्धकारविध्वंसि, यत् तज्ज्ञानं समुच्यते ।।१।।

विवेको जायते यस्मात्, तज्ज्ञानं श्लाघ्यते जिनैः,
शेषमन्यच्च विज्ञानं, भवभ्रमणकारणम् ।।२।।

यथा रतिं लभन्ते हि, मानसे मानसौकसः।
ज्ञानिनो ज्ञानमग्नास्तु, लभन्ते तां ततोऽधिकाम् ।।३।।

क्षयन्ति यानि कर्माण्यऽज्ञानिनो, वर्षकोटिभिः।
ज्ञानीतूच्छ्वास मात्रेण, क्षपयन्ति ततोऽधिकं ।।४।।

यथावज्ज्ञायते वस्तु, येन तज्ज्ञानमुच्यते।
ज्ञानमज्ञानमेव स्याद्, मिथ्यात्विनां विपर्ययात् ।।५।।

सर्वज्ञैः कथितं ज्ञानं, पंचधा जिनशासने।
मतिश्रुतावधिमनः–पर्यवकेवलानि च ।।६।।

अहो विचित्रमोहान्ध्यादज्ञानाच्छादिता जनाः।
लभन्ते न हि सज्ज्ञानमुन्मार्गेण विडम्बिताः ।।७।।

सम्यग्ज्ञानं सदा ज्ञेयं, सर्वभावप्रकाशकम्।
ज्ञानैकदृङ्महायोगी, प्राप्नोति "**प्रशमा**"मृतम् ।।८।।

# सूरिरामचन्द्रदीक्षाष्टकम्

– साध्वीजीश्रीदिव्यरत्नाश्रीः

प्रणम्य श्री महावीरं, कर्मारिगणघातकम् ।
रामचन्द्रं गुरुं वन्दे, दीक्षायुगप्रवर्तकम् ।।१।।

अगणिता गुणा यस्य, तान् वक्तुं पार्यते कथम्।
गुरोस्तस्य प्रसादेन भक्त्या स्तौमि तथाप्यहम् ।।२।।

पूर्वपुण्यप्रभावेन, येन सत्कुलजन्मना।
पितृभ्यां दत्तसंस्काराद्, धर्मे मति र्दृढीकृता ।।३।।

मनुष्यजन्मनि प्राप्ते, दीक्षैव श्रेयसी मता।
इति पितुः पितामह्या, कर्णेऽमृतमसिच्यत ।।४।।

तत्सुधासिक्तसम्यक्त्व–श्रद्धादिगुणवृद्धितः।
बाल्येऽपि वयसि यत्नो, दीक्षायै बहुधा कृतः ।।५।।

विघ्नश्रेणीः समुच्छिद्य, गंधारे स्वीकृतं व्रतम्।
बालदीक्षा विरोधस्तु, दूरीकृतः सुयत्नतः ।।६।।

दीक्षादुंदुभिनादेन, भव्याःनैके प्रबोधिताः।
व्याख्यानस्यप्रभावेण विरोधिनो पि दीक्षिताः ।।७।।

यस्य प्रभावतो दीक्षा, मया लब्धा सुपुण्यतः।
सा मुक्तिसुखदा दीक्षा, अस्तु श्रेयः पदाय मे ।।८।।

# ।। समर्पणाष्टकम् ।।

- साध्वीजीश्रीचिंतनप्रियाश्रीः

अमर्त्यतरु–कामधुक्–चिन्तामणिवदीप्सितम्
समर्पणं गुणो दत्ते विश्वे जयत्यहर्निशम् ।।१।।

दृष्ट्वा समर्पणं, राम–चन्द्रस्यायाति मत्स्मृतौ।
विनीतशेखरो नित्यं, सद्गुरु गौतमो गणी ।।२।।

दीक्षाग्रहणयोग्यानां, कीर्त्तिताः षोडशो गुणाः।
प्रष्ठं समर्पणं प्रोक्तं, सदा शास्त्रविशारदैः ।।३।।

व्याख्यानमद्य कुर्वेवं, गुर्वाज्ञां प्रतिपालयन्।
व्याख्यानमकरोत् शैक्षोऽप्यहो ! आज्ञावशंवदः ।।४।।

दर्शयितुमशक्तोऽस्मि, तथाप्युत्तम्भितं मनः।
तस्य गुणावलीं गातुमभीक्ष्णं यत्यते मया ।।५।।

गुरूसेवयैव प्राप्येत, सर्वकलाकुशाग्रता।
एतत्सामर्थ्यतोऽपि स्यात्, सिद्धिः सर्वगुणावहा ।।६।।

गुरोरस्वस्थतां श्रुत्वा, सूरिराम आपद् व्यथाम्।
अविश्राम्य क्षणं क्वाप्यचलत् स्तम्भनकं पुरम् ।।७।।

तद् गुणचिंतनेनैव, प्राप्य भवनिरागताम्।
लब्ध्वा च दर्शनं शुद्धं, श्रेयस्सौधे वसाम्यहम् ।।८।।

# रामचन्द्रः स सूरीन्द्रो भूयाद् भव्यप्रशान्तये

*- श्री भालचन्द्र कविः-खंभात

पाश्चात्यसंस्कारप्रदत्तदीक्षा-दिङ्मोहभावंगमिताः समन्तात् ।
चार्वाकसिद्धान्तनिविष्टचित्ताः, प्राचीनरीतिं तृणवद् वदन्ति ।।१।।

आत्मानं पण्डितंमन्या, वैतण्डिकवरा इमे ।
बुद्धेस्तु सार्वभौमत्वमात्मन्येव वितन्वते ।।२।।

इमे यद्वाक्सुधां पीत्वा, जाताः सन्मार्गवर्तिनः।
रामचन्द्रः स सूरीन्द्रो, भूयाद् भव्यप्रशान्तये ।।३।।

एतस्मिन् घोरघोरे, विततबहुतरा-निष्टकार्यप्रपञ्चे,
काले क्रूरे किलाप्ते, कलिकृतविभवे, पुण्यविध्वंसदक्षे ।
सर्वान् दिङ्मूढलोकान् नमति सुमतितः, सत्पथं शीघ्रमेव।
सूरीन्द्रः सोऽत्र भूयाद् विबुधजनमनःशान्तये रामचन्द्रः।।४।।

चार्वाकादधीनहीनात् कुथितमतियुतान् त्यक्तलज्जादिभावान्।
मर्यादालोपपुष्टान् विदलितविनयान् तर्कतः क्षीणशास्त्रान्।।
उद्धारातीतबुद्धीनतिघनघृणया यो विवेके विधत्ते।
सूरीन्द्रः सोऽत्र भूयाद् विबुधजनमनःशान्तये रामचन्द्रः।।५।।

यद्व्याख्यानं मनोज्ञं बहुविधधिषणावैभवाढ्यं विशेषात्,
तथ्यं पथ्यं नितान्तं भुवि किरति मुदा सर्वमान्यप्रतीतिम्।
प्रज्ञागम्यं प्रशान्तं प्रसरति परितो जित्वरं लोकवृन्दे।
सूरीन्द्रः सोऽत्र भूयाद् विबुधजनमनःशान्तये रामचन्द्रः।।६।।

* व्याकरण-ज्योतिषविशारदः

वाक्चातुरीसुन्दरता यदीया, प्रकर्षभाक्कल्पलतां बिभर्ति।
चेतांसि यूनां परिमार्ष्टि प्रेम्णा, सूरीन्द्रवर्यः स तु रामचन्द्रः।।७।।

सूरीन्द्रो रामचन्द्रोऽयं, भव्यभावाभिनायकः।
सङ्घसौभाग्यभृद् भूया-ल्लोकानां श्रेयसे सदा ।।८।।

कविना **भालचन्द्रेण, दयाशङ्कर**सूनुना।
अष्टकं रचितं प्रेम्णा, स्तम्भतीर्थाधिवासिना।।९।।

शब्दः, रूपं, रसः, स्पर्शः, गन्धश्च इति पञ्चानां समुदायो हि जगद् ।।

## विभाग : २

# अर्वाचीनकृतयः

## खण्ड : ४ प्रकीर्णककृतयः

(वसंततिलका.....)

निःश्रेयसस्मरणमात्मप्रकाशकारम्,
यत् सख्यभावकरणं परमोदकारम्।
यत्पाठनञ्च भवमुक्तिकरं प्रशस्यम्,
'निःश्रेयसेन' भवतात् वरमित्रभावः।।१।।

'संगस्तु रंगकर' एव वचः सुसत्यं,
निःश्रेयसानुभवतः सुजनाः! विन्दन्तु।
कुर्वन्तु संगममलं सुखदं ह्यनेन,
निःश्रेयसेन भवतात् वरमित्रभावः।।२।।

श्रेयस्पदेन गुणदेन सदैव सङ्गः
स्तात् श्रेयसे निखिलकर्मविमुक्तयेऽसौ।
आत्मीयता च परमा सफलाऽस्त्वनेन,
निःश्रेयसेन भवतात् वरमित्रभावः।।३।।

– श्री.....

# ।। सात्म्यभोजनम्।।

– आचार्यश्रीविजयकल्याणबोधिसूरिः

न ह्यवधीरितभोजनादिसद्विधानानामाकालं रुग्णवपुषां सिद्ध्यति कोऽपि परलोकक्रियायत्नः, ऐहिकप्रयोजनेऽप्यनुष्ठानेऽप्रत्यलत्वात् तेषाम्। अत एवास्माकं पूर्वमहर्षयः परमकरुणया भोजनसद्विधानमप्युपदिष्टवन्तः, यथाहुः – कलिकालसर्वज्ञाः श्रीहेमचन्द्राचार्याः

काले भोक्ता च सात्म्यतः – इति (योगशास्त्रे)

क्षुत्काल एव भोजनकालः, अतोऽत्र काले=बुभुक्षासमये, भोक्ता=अन्नाद्युपजीवकः, लौल्यादिपरिहारेण यथाऽग्निबलं हितं मितं च भुञ्जीतेति भावः।

लौल्यं हि प्रमाणाद्यतिक्रमकारितया सर्वरोगैकमूलम्, अतस्त्याज्यं तत्। अभिहितञ्च–

कण्ठनाडीमतिक्रान्तं, सर्वं तदशनं समम्।
क्षणमात्रसुखस्यार्थे, लौल्यं कुर्वन्ति नो बुधाः ।।१।। इति।

तथा–

जिह्वे ! प्रमाणं जानीहि, भोजने वचने तथा।
अतिभुक्तमति चोक्तं, प्राणिनां मरणप्रदम् ।।२।। इति।

वमनं विरेचनं मरणादिकं च फलमतिरिक्तभोजनस्य, अतो न तत् सम्यक्। यो मितं भुङ्क्ते, स एव परमार्थतो बहु भुङ्क्ते,

अक्षुधितेन हि भुक्तममृतमपि विषं भवतीति ध्येयम्। तथा क्षुत्कालातिक्रमाद् भवत्यन्नद्वेषः, देहसादश्च, तस्य बलक्षयफलत्वात्।

यस्य प्रकृतेर्यद् भोजनमविरुद्धम्, अत एव तस्य तत् सुखित्वायावकल्पते, तत् तस्य सात्म्यमित्युच्यते, अतो देशं कालं प्रमाणं स्वप्रकृतिं च ज्ञात्वा भोजनं ग्राह्यम्, न तु यादृच्छिकतया, रसलम्पटतया वा, तस्या एव प्रागुक्तनीत्या रोगाणां दूतीत्वात्, अत एव निरूपयन्ति तत्त्वज्ञाः –

इष्टमूलानि[१] शोकानि, रसमूलानि व्याधयः।
लोभमूलानि पापानि, त्रीणि त्यक्त्वा सुखी भव ।।३।। इति,

एवमार्यमार्गमनुसृत्य भवन्तु सुखिनो भविन इति शम्।

---

१) प्राचीनोऽयं श्लोकः, यथोपलभ्यः, तथैवात्रोपन्यस्तः।

# कस्तावत् परमार्थतो नास्तिकः ?

– आचार्यश्रीविजयरत्नसेनसूरिः

अस्मिञ्जगति ज्ञानिनो यावदुपकुर्वन्ति, तस्मादधिकमपकारमज्ञानिनः कर्तुं प्रभवन्ति। सुयुक्तीनाम–पेक्षातः कुयुक्तीनां प्राबल्यमधिकं विद्यते। सम्यग्दृष्टिभ्य आत्मभ्योऽपेक्षया मिथ्यादृष्टयोऽनन्ताः विद्यन्ते। कथनमिदं यावत्सत्यमस्ति, तावदेवेदमपि सत्यमस्ति यद् ज्ञानिनां ज्ञानसूर्यः, तज्जाज्वल्यामाना किरणाश्च, यत्र प्रसरन्ति तत्र कीदृशोऽपि घोरोऽन्धकारः कथं नु स्यात्, क्षणमात्रमपि स्थातुं न प्रभवति। उक्तं हि–(सूर्ये तपत्यावरणाय दृष्टे कल्पेत, लोकस्य कथं तमिस्रा ?)

श्रीमतो वीतरागस्य पूजा कर्तव्या उत नेति ? विषयोऽयं बहुभिर्विवादास्पदतां नीतः। तत्त्वविद्भिः सर्वैरेव महापुरुषैः सर्वसम्मत्यैकेनैव च स्वरेण समादिष्टं यत् ''श्रीमद्वीतरागदेवस्य समाराधनं मुख्यतया तन्मूर्तिपूजयैव सम्भवति, नान्यैः कोटिभिरुपायान्तरैरेतत् सुशक्यमस्ति''। अपरतोऽज्ञानिभिर्मिथ्या–दृष्टिभिरेतद् विपक्षे नैकाः कुयुक्तयः समुपस्थापिताः, ज्ञानिजनप्रदर्शितस्य पावनमार्गस्याऽवरोधनप्रयासे च तैर्न कश्चिदपि कुतर्कः समुपेक्षितः।

जगति ज्ञानापेक्षयाऽज्ञानस्य साम्राज्यं विशेषतो व्याप्तमस्ति, अत एव कुतर्काणां प्रभावोऽज्ञानिषु सरलेषु च जनेषु अचिरादेव जायते। एकतो नैसर्गिकरुपेणाऽज्ञानस्य साम्राज्यं विद्यते। अपरतश्च कुतर्काणां प्राबल्यमस्ति। एवमुभयोर्मेलनेन श्रीमतो वीतरागदेवस्य पवित्रमूर्त्तितः तस्य परमकल्याणकारिण्या ऊसनायावा सकाशादज्ञानिनां सरलात्मनां चापि चेतो विचलितं भवेच्चेन्नाश्चर्यम्।

नास्तिकादपि यः खलु कपटास्तिकः स स्वार्थवशाज्जनप्रत्यक्ष आस्तिकतां प्रकटयति, जन परोक्षे च तद् विरुद्धमाचरति विशेषेणाऽनर्थकारी भवति। मूर्त्याऽस्वीकरणविषयकस्य मतस्य समुत्पत्तिर्यादृगज्ञानात् संजाता, तद्वन्मूर्तिपूजायां हिंसायाः, ज्ञानस्य च स्वरूपनिरुपणे वा कुबुद्धिरपि मित्थ्यात्वादेव संभूता। प्राकृतजनाः स्वतो मतस्यास्य भवप्रदामज्ञानतामहितकारिताञ्च ज्ञातुं न प्रभवन्ति, अत एव ज्ञानिन एतान् बोधयितुं भागीरथं प्रयत्नं कृतवन्तः।

विद्यमानप्रमाणसिद्धान् आत्म–परलोकादि पदार्थान् नास्तिको यावदपकुरुते, तदांशिकस्वरूपं न मनुते, अन्यथा वाऽङ्गीकुरुते। अत एव श्रीमति जैनदर्शन एतादृश आत्मानः व्यवहारेणऽऽस्तिका सम्मता अपि परमार्थतो नास्तिककोटिका एव।

ये श्रीमतां जिनेश्वरदेवानां सत्यवचांसि यथावदगृहीत्वा विपरीतक्रमेण सङ्गृह्णन्ति, चेत्तेऽपि श्रीमति जिनशासनेऽऽस्तिक्यभङ्गाय न कल्पते, यच्चैषा नास्तिकतैव प्रकटनास्तिकतातः सकाशाद् या हानिः जायते तदधिकतरा हानिः प्रच्छन्नास्तिकतात एवोपजायते। प्रकटनास्तिकस्तु सुसंयोगवशतः पुनरप्यास्तिको भवितुमर्हति, न तु प्रच्छन्नो नास्तिकः, यत एव वस्तुत आस्तिकोऽसन्नपि अधिकांशताऽऽस्तिकताया मिथ्याभिमाने निमग्नस्सन्नऽशेषं स्वकीयं परकीयञ्च जीवनं विनाशयति।

# ''किमयं किम्पाकवृक्षः''

– 卐 आचार्य श्रीविजयहेमप्रभसूरिः

वात्सल्यवारांनिधिपरमपूज्यपंन्यासप्रवराणां लघु 'गुरुभ्राता' श्री हेमप्रभसूरिवरः, 'गुजरात समाचार' दैनिक वृत्तमत्रस्थ जुलाइ २५ तारीखदिनाङ्कस्य अङ्काद् **''विश्वनुं सौथी झेरीवृक्ष भारतनां दक्षिण कांठा विस्तारमां थाय छे.''** इति शीर्षकं पठित्वा आकृष्टमनसा वृत्तं तद् सकलं पठति. तदनन्तरं शास्त्रेषु समुल्लिखितः किंपाकवृक्षः किमयमिति संदिह्य गवेषितं च तैस्तु गीर्वाणगिरायां तत् तथ्यं ससाक्षिकं अत्र प्रस्तूयते – सं.

## ।। किमयं किम्पाकवृक्षः ?।।

लता–विटपि–वृक्षादयो



पृथिव्यां प्रत्येका लता–विटपि–वृक्षादयो यत् किमप्यौषधीयगुणं धारयन्ति। किन्तु तेषु कश्चित् विषमयोपि विद्यते। तत्र सर्वाधिकविषमयद्रुमः, भारतवर्षे दक्षिणसमुद्रतटे उपलब्धः।

केरळराज्ये प्रादेशिकभाषायां ''ओथालांगा'' इत्यभिधायिनमेतमाङ्ग्लभाषायां वनस्पति–वैज्ञानिकाः **''सरबेरा ओडोलम''** इत्यभिधानेन जानन्ति।

---

卐 पू. वात्सल्यनिधि पं. वज्रसेनविजयलघुभ्राता आचार्यहेमप्रभसूरिः।

अयं वृक्षः, यथा पल्लवितः आकर्षकः सुन्दरः फलवावाँश्च दृश्यते, तथा परिणामे विपरितः अर्थात् मृत्युदायकः। एतस्य पुष्पाणि, फलानि, पर्णानि, बीजानि च खादन् जीवः तत्कालमेव पञ्चत्वं प्राप्नोति।

अत एव आङ्ग्लभाषायां **''स्युसाइड ट्री''** इत्यपराभिधया अपि ख्यातस्य एतस्य वृक्षस्य बीजे अधिकतरं विषं विद्यते। तथैव दक्षिण–पूर्व–एशियाखण्डस्यामुकेषु देशेष्वप्ययं द्रुमो दृश्यते।

संशोधका मन्यन्ते–यदस्मिन् विटपिनि **'सरबेरीन'** इति नामकं विषतत्वमस्ति, देहे दीयमानस्य 'विष–इन्जेक्षनस्य' इवास्य विषतत्त्वस्यापि प्रक्रिया भवति।

अस्य, बीजांशमात्रस्य भक्षणेपि उदरवेदना वमनं च प्रभवति। तदनन्तरं हृदय–धबत्कारा (हार्टरेट्) अनियमिता भवन्ति। तदान्याप्यौषधिरस्य विषशमनोपाये न प्रभवति।

अत एव वनस्पतिशास्त्रज्ञाः शोधसंशोधकाश्च विषमविषमयममुं वृक्षं 'क्रोबा'–जातीयाहिसमं मन्यन्ते। आश्चर्यं नाम द्रुमस्य विषप्रभावपरीक्षणमपि झटिति न गम्यते।

अन्यं यत् हताशा (डीप्रेशन) रोगग्रस्तः स्वजीवनस्य समापनायापि एतस्य वृक्षस्य बीजोपयोगं कुर्वन् दृश्यते।

## ।। अस्य वृक्षस्य परिमाणम् ।।

अयं वृक्षः दश मीटर् यावद् ऊर्ध्वं याति। अस्य पुष्पाणि श्वेतानि, फलानि च जामफल–सदृशाणि नीलवर्णानि सन्ति। विपरितसंयोगे–वातावरणेऽप्यस्योद्भवो नैसर्गिकः, विकासोप्यस्य विना अधिकपरिकर्मणः झटितितरश्च भवति। श्रूयते च एकोनविंशतितमे शतके एतादृशे एव वृक्षः ''माडागास्कर'' प्रदेशे आसीत्। यस्य फलानि भुक्त्वा सहस्रशो जना मृत्युं गताः। शास्त्रेषु किंपाक इति नाम्ना यः वृक्षः ख्यातः तदेव अयं स्यात् इति मन्ये।

## प्रस्तूयते चाऽत्राऽस्य कृते शास्त्रसन्दर्भ :-

● शब्दकोश :

१) 'महाकालस्तु किंपाकः' अभि. चिन्तामणि श्लो. ११४१ –
स्वोपज्ञवृत्तिः–महान कालो मृत्युरस्मात् महाकालः ।

२) अभिधानराजेन्द्र भाग ३, पृ. ५२६
कुत्सितो पाको यस्य. 'महाकाललतायाम्'।

३) वाचस्पत्यम् पूर्वोक्त एव सन्दर्भः,(पृष्ठाङ्को न प्राप्तः)

४) भगवद्गोमंडल (ई २००७) पृ. २२५१ –
१) किंपाक (सं.) ते नामनुं झेरी फळवाळुं अेक झाड, तेनुं फळ जोवामां रमणीय अने खावामां अतिमधुर होय छे. परंतु खाधा पछी थोडी वारमां ज मृत्यु नीपजावे छे.
२) महाकालनामनो वेलो.

**• शास्त्रीयः**

५) ● किंपाग फलोवमम् – आ. श्रु. १ रु. अ. २३
अर्धमागधी शब्दकोष – रत्नचन्द्रजी सं.

● किंपाकफलोवमं मुणिय विसयसोक्खं – औपनिपातिकसूत्र २३।
मलयगिरीटीका – विषवृक्षफलतुल्यं । सं.पू. मुनिचन्द्र सूरिजी (१/६/२०१२) पृ. ४६
सुरसुंदरिचरियं – धनेश्वर सूरि (वि. १०२५) परिच्छेद १२, १६२–१६९ गाथा

६) तावय तत्थासन्नं पिच्छामि विसालसाल सोहिल्लं।
पवणाकंपियफलभरविणमिय गुंजोहसंकीणम् ।।१६२।।
मणहारिफलं पसरंतपरिमलं बहलपत्तलच्छायं।
तप्फलभक्खण निवडंतजंतुसंतान कयसद्दं ।।१६३।।
निवडंत–ससंत–तडप्फडंत–मय–विहगकलियभूवीढं।
तरुवरमुच्चं मच्चुं व जंतुसंताणनासयरं।।१६४।।
तं दट्ठुं **विसरुक्खं** विचिंतियं गुरुयदुक्खतवियाए।
पियसहि ! हंसिणि तइया मरणम्मि निबद्धचित्ताए।।१६५।।
गतुं तस्स समीवे फलं मुहम्मि पक्खित्तं... ।।१६६।।
इय भक्खिऊण ससोमं खणंतरं जाव तत्थ अच्छामि।
तावय गुरुविसवियणाए विब्भला महियले पडिया।।१६८।।
तओ भमिअं व वणतरुहिं उव्वत्तियं व सयल वसुहाए।
संघीहि विहडिअं पिव विसीइयं सव्व अंगेहिं।।१६९।।
तत्पश्चात् कश्चित् तरूणो विषशोधकमणिना विषं उत्तारयति।
इति कथा प्रवाहः।

७ पुष्पमाला–मलधारी हेमचन्द्रसूरि (द्वादशशताब्दी)

६) हुंति मुहिच्चिय महुरा विसया, किंपाकभूरुहफलं व .. (३९२ गाथा)

**।। इति शम्।।**

# ।। ऋद्धिः ।।

– श्रीकमलः

ऋद्धिः बाह्याभ्यन्तरा ऋद्धिः, समृद्धिः श्रीः संपत्तिरिति नामान्तराणि ऋध्यति इति ऋद्धिः। ऋद्धिः समृद्धिः अथवा ऋ ऋच्छतिः = प्राप्नोति। धि–धिनोति तृप्ति यया प्राणिगणः इति ऋद्धिः।

सा ऋद्धिः द्विविधा, प्रथमा बाह्यरुपा–द्वितीया अभ्यन्तररुपा। तयोः द्वौ प्रभेद्वौ स्तः। शुभाऽशुभौ रूपौ। तत्र –

बाह्याऋद्धिः=धन–धान्य–विभव–निरोगिता–सत्परिवार–कुल–देश–देव–गुर्वादिः। अभ्यन्तराऋद्धिः = ऐश्वर्य–आदेयवचनीयता–विनयादिशालित्व–कृतज्ञता।

– अशुभा बाह्याऋद्धिः = अनीतिमार्गावाप्तधनादिकं, समृद्धियुक्तमपि कुकुलादिकं, असभ्य–जनकजनन्याद्याः, कुदेव–कुगुरु–कुधर्माणाञ्च प्राप्तिः।

– शुभा बाह्या ऋद्धिः = न्यायाध्वना धनादि संप्राप्तिः– धर्मसहायीपरिवारः, सुदेव–सुगुरु–सुधर्माणां संप्राप्तिः।

– अशुभा अभ्यन्तरा ऋद्धिः। ऐश्वर्यप्राप्तिः, लोकसंतापमपि कृत्वा दुष्कर्मसु चाज्ञाकारित्वं।

– शुभाऽभ्यन्तरऋद्धिर्ध–संप्राप्तायां तया तया शुभसामग्र्या स्वात्मोद्धारचिकिर्षा भवति। तथा च न पापाचरणकरणे मनो भवति। अभ्यन्तरसमृद्ध्या जीवो भगवद्वचनं प्रमाणीकृत्य विषयादिकैरशुभभावैः स्वात्मानं संरक्षतीति तस्य हार्दम्।

अशुभाऽभ्यन्तरसमृद्धौ तु सर्वाभ्यन्तरऋद्धिं सम्यग्रुपेण द्रव्यादिकं चोपार्ज्य स्वप्रतिष्ठार्थं व्यतते, न धर्मार्थम्, न च स्वहिताय। सुदेव–गुरुप्रमुखमपि संप्राप्य संसारपरिपुष्टि यथा भवेत् तथा भवति, स सुखलिप्सु धर्ममपि संसारार्थमेव करोति, न मुक्त्यर्थम्।

ततः सर्वऋद्धि प्रकारं सूक्ष्मदृष्टया निरीक्ष्य शुभाऽभ्यन्तर्रर्द्धि प्राप्तौ प्रयतितव्यम्। तत एव स्वात्मगुणाः प्रकटीभवन्ति। अतो न ऋद्धिमात्रे लोलुपता कर्तव्या। किन्तु शुभर्द्धि प्रापणे प्रयासः कर्तव्यः।

।। इति शम् ।।

# चारित्र सप्तविंशतिका : १६

## * सद्गुरुगुणकीर्तनम् *

– पंन्यासश्रीसम्यग्दर्शनविजयो गणी

(शार्दूलविक्रिडीतम्)

माङ्गल्यम्

ऐन्द्राच्चर्चः पार्श्वनाथः, सुगतिमतिकरः, सेव्यते यैः सदैव
सौन्दर्यस्वात्मनस्तैः, प्रवरगुणकरं, प्राप्यते भव्यवृन्दैः।
तं पार्श्वं संस्तुवेऽहं, परमसुखपथे यः सखा सौख्यहेतुः
माङ्गल्यश्रीप्रकर्षो, मम तव कृपया स्यात् प्रभो! पार्श्वनाथ!।।१।।

(द्रुतविलम्बितम्) IIISIISIISIS

गुरुवरो विदधाति सुसंयमम्,
निरतिचारमनन्तगुणात्मकम्।
भविजने च भवेद्धितकारकम्,
सुखकरं सुगुरुं प्रणमामितम्।।२।।

सुरभिरम्यतया कमलं यथा,
सरसशैत्ययुतं च जलं यथा।
गुरुवरेण समं चरणं तथा,
सुखकरं सुगुरुं प्रणमामितम्।।३।।

वसुमतीसु यथाऽस्तिसहिष्णुता,
वरप्रतापयुतश्च रवि र्यथा।
चरणसङ्गयुतः सुगुरुस्तथा,
सुखकरं सुगुरुं प्रणमामितम्।।४।।

गुरुवरश्चरणस्य गुणैर्युतः,
सुगुरु–संयमयो र्न विभाजनम्।
गुणिगुणौ तु कथञ्चिदभिन्नकौ,
सुखकरं सुगुरुं प्रणमामितम्।।५।।

गुरुवरस्य सदा स्मरणे हितम्,
गुरुनतिर्भवनाशकरी भवेत्।
गुरुवरस्य गुणास्तु सुखावहाः
सुखकरं सुगुरुं प्रणमामितम्।।६।।

स्मर सदैव पवित्रगुणान् गुरोः,
गुरुगुणस्मरणं गुणलाभदम्।
सुगुरुसङ्गतिसन्ततिमाचर,
सुखकरं सुगुरुं प्रणमामितम्।।७।।

चरणभावसमुद्र निशाकरम्;
हितकरं भवसिन्धुतरण्डकम्।
जयकरं विषयादिविषापहम्,
सुखकरं सुगुरुं प्रणमामितम्।।८।।

सकलदुष्टविभावविनाशकृद्,
भविकपङ्कजपुञ्जविनाशकृत्।
दलितपापभरसमतासरः
सुखकरं सुगुरुं प्रणमामितम्।।९।।

सुमनसा हतकर्मबलं परं,
नहि विभावविकारनिकेतनम्।
सुभगसाम्यरसझरणादरम्,
सुखकरं सुगुरुं प्रणमामितम्।।१०।।

शिवकरं शुभबोधप्रभाकरम्,
शुभकरं भवतापसुधाकरम्।
गतमरं शमपद्मविभाकरम्,
सुखकरं सुगुरुं प्रणमामितम्।।११।।

कृतसुखः गुणपञ्चदशान्वितः,
परमदः सुखरत्नकरण्डकः।
मम गुरु र्भवपंथसुमित्रकः,
सुखकरं सुगुरुं प्रणमामितम्।।१२।।

नमनतो वितनोति गुणालवं,
स्मरणतः शुभभावविबोधकम्।
वचनतो हितसंततिदायकं,
सुखकरं सुगुरुं प्रणमामितम्।।१३।।

सुविधिना प्रतिपद्य सुसंयमं[१]।
गुरुकुलं[२] समुपालितवांश्च यः,
सुचरितं श्रुतशीलं[३]मखण्डितम्।
सुखकरं सुगुरुं प्रणमामितम्।।१४।।

सतत[४]मागमवारिधिपारगम्
विमलतत्त्व[५]विबोधबृहस्पतिम्।
जिनमते रमते सततं सुधीः,
सुखकरं सुगुरुं प्रणमामितम्।।१५।।

विषय[६]तापविमुक्तिपदप्रदम्,
प्रशमभावविशुद्धिरतं सदा।
प्रवचने वचने बहु वत्सलम्[७],
सुखकरं सुगुरुं प्रणमामितम्।।१६।।

भविक[८]सत्वविबोधनतत्परम्,
सुगृहितादरणीय[९]वचः सदा।
प्रवरशिष्यगणेष्वनु[१०]वर्तकम्,
सुखकरं सुगुरुं प्रणमामितम्।।१७।।

गुण[११]गंभीरसमुद्रसमो गुरुः,
न भवति श्रमवान् स कदाप्यहो!।
न हि[१२] विषादधरः श्रमतोऽप्यहो,
सुखकरं सुगुरुं प्रणमामितम्।।१८।।

उपश[१३]मादिसुभावधरो मम,
गुरुवरा गुणसंततिसंयुताः।
जिनपति प्रथितं पथमाचरे,
सुखकरं सुगुरुं प्रणमामितम्।।१९।।

प्रवचनार्कप्रतापप्रमो[१४]दकम्,
प्रवचनार्थप्रकाशनतत्परम्।
भविकबोधविधौ वरपण्डितम्,
सुखकरं सुगुरुं प्रणमामितम्।।२०।।

गुरुपदे गुरुणैव नियोजितम्,
मम गुरुः कुरुतात् शिवसंपदः।
भवजलाम्बुधितारणसेतुकः,
सुखकरं सुगुरुं प्रणमामितम्।।२१।।

जलनिधिर्मणिरत्नचयैर्यथा,
करचयैस्तपनस्तु यथा तथा।
गुरुवरः सुगुणैः परिशोभते,
सुखकरं सुगुरुं प्रणमामितम्।।२२।।

गुरुवराः कथिताः सुगुणान्विताः,
षडधिकत्रिदशैः सुगुणैर्युताः।
न भविको लभते गणनां कदा,
सुखकरं सुगुरुं प्रणमामितम्।।२३।।

यदि रवेरुदयो रजनौ भवेत्,
अपरदिक्षु समुल्लसते रविः।
तदपि नैव गुरोर्गुणकीर्तनम्,
सुखकरं सुगुरुं प्रणमामितम्।।२४।।

निपुणसन्मतिविस्तरभास्करम्,
यतिगणस्य सुभावविभासनम्।
गुरुवरः सुगतेर्वरकारणम्,
सुखकरं सुगुरुं प्रणमामितम्।।२५।।

गुणकरा चरणादरतोभृशम्,
प्रतिपलं चरणैकविशुद्धिदम्।
असुमतां भवमुक्तिपथं वरम्,
सुखकरं सुगुरुं प्रणमामितम्।।२६।।

(शिखरिणी)
मयात्वित्थं प्रोक्ताः प्रवरगुरुगुणाः सच्चरणजाः,
ततो लब्धा तृष्टिः, शुभदसुखदाऽऽध्यात्मसुलभा।
पुनः पुष्टिः प्राप्ता परमपददा पुण्यविपुला,
अथ ''श्रेयो'' भूयात् जिनसमयसद् ''दर्शन''करम्।।२७।।

''धनमिच्छति, किन्त्वन्यायेनानीत्या वा नैव''
इति ध्येयं यस्याऽस्ति सः सज्जनः।

# चारित्र सप्तविंशतिका : १७

– पंन्यासश्रीसम्यग्दर्शनविजयो गणी

## * सत्शिष्यत्ववर्णनम् *

(स्रग्धरा)

मांगल्यम्

ऐन्द्रैः सद्भक्तिभावैः सुरगिरिशिखरे स्नात्रपूजा हि यस्य,
पापातेर्नाशनाय गुणगणखचिता या कृता पुण्यगर्भा।
माङ्गल्यं सत्स्वरुपं, गुणतितितिलकं सौख्यमार्गैकसेतुम्,
विघ्नव्रातैकहन्तुं प्रवरशुभमनाः पार्श्वनाथं सुसेवे।।१।।

## (मन्दाक्रान्ता)

भो। भो। भव्याः। परमगुणदं सच्चरित्रं सुसेव्यम्,
चारित्रात्स्यात् सुगुणनिचया सद्गुरुतत्वप्राप्तिः।
संशोभन्ते गुरुवरगुणाः सद्विनेयस्य प्राप्त्या,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२।।

सत्शिष्यः सः प्रवरचरणं सेवते शुध्दभावैः,
रागाद्यै र्यो विरहितमनो नष्टदुर्भावभावः,
अर्चन्नित्यं शुभगुरुपदं मोक्षराज्यैकलिप्सुः,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।४।।

चारित्रात् सद्गुणगणभरो योऽविनाभावयुक्तः,(भूतः)।
संप्राप्य स्यात् चरणकलितो शिष्यभावः प्रशस्तः,
भक्त्या स्तौमि प्रवरसुगुणदान् शुद्धशिष्यत्वरुपान्
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।४।।

चारित्राऽऽप्त्यै गुणगणततिः प्रापणीया भवेत् का,
कीद्दक् शिष्यो भवति विरते र्भाजनं शासने यः।
तांस्तां पुण्यां शुभगुणपदां वर्णयामि प्रशस्ताम्
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।५।।

आर्यावर्ते[१] शुभचरणदां जातिमान् सत्कुलीनः,
क्षीणप्रायाः सततभयदा कर्मर्मर्माधिकाराः[२]।
धी[३] नैर्मल्यं विमलसुखदं यस्य स्यात् सुपवित्रम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।६।।

वैराग्यस्य प्रवरसुपथे, भावना सा विचार्या,
मानुष्यं[४] स्यान् न सुलभतरं भीमसंसारचक्रे।
संयोगाः स्युः सकल–विषयाः भो! वियोगन्तरुपाः,
साद्यन्ता ये विभवनिचयाः स्वल्पकाला निरुक्ताः।।७।।

दुखेहेतु र्विषमविषया दारुणस्तद्विपाकः,
संसारेऽस्मिन्नतिनिगुणताचिन्तनात् स्याद्विरक्तः[५]।
दुर्दान्ताश्च भवभयकराः स्वल्परुपाः[६] कषायाः,
चारित्रं तं भजत सुजनाः पापसंतापहारम् ।।८।।

[७]हास्या– द्या ये परिभवकरा ह्रासतां यस्य प्राप्ताः
कृत्यघ्नानां विषधरसमं यो विचिन्त्य स्वभावं।
कृत्यज्ञा[८] स्यादुपकृतिकृतां, संस्मरत् स्वोपकारम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।९।।

सद्भावाद् यः प्रगुणविनयः[९] नित्यमौचित्यकारी,
जैनेशाऽऽज्ञा सुगुणविनयात्, पाल्यते येन भक्त्या।
शिक्येणेत्थं गुरुवर कृपां पाल्यते मोक्षमूलम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१०।।

राजाद्यानां[१०] खलु (बत) बहुमतो यो भवेद्स्वचरित्रैः,
अद्रोही[११] सो भवति च सदा देवगुर्वादीनां यत्।
आत्मस्थैर्यं प्रभवति सदा स्वात्मनोभावलक्ष्म्या,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।११।।

अध्यात्माऽऽप्त्यै जिनमतरतिः, स्वात्मनि स्थापयेद्यः।
कल्याणार्थं सकलगुणदं सद्गुरुं सेवते यः।
कल्याणार्थं[१२] भवतिभविकः संयमार्थं सयोग्यः,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१२।।

तत्वं नित्यं त्रिविधविषयं देवगुर्वादिधर्मं,
तत्राद्यं स्यात् सुगुणनिचयं, देवमाद्यंगुणाढयम्।
आज्ञा तस्य परमशिवकृत् मुक्तिमार्गैकपद्या,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१३।।

अन्यान् देवान् न भजति कदा, सेवते श्री जिनेन्द्रम्,
उन्मार्गस्थं न भजति गुरुं, सद्व्रतं श्रद्धते च।
सेवा सङ्गं रचयति मुदा, सद्गुरोर्भावपूर्णम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१४।।

जैनं धर्मं स्मरति सुखदं नैव कुर्यात् कुभावम्,
प्राणान् मुञ्चेत् त्यजति न कदा लेशतोऽप्येषधर्मम्।
धर्मसर्वजिनप कथितं सेवते श्रध्दया च।
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१५।।

इत्थं तत्त्वं सुविहितमनो श्रध्दते भावशुध्दया,
श्रध्दातत्वं[१३] हृदयकमले स्थापयेद् यः सुशिष्यः।
श्रध्दातत्वंपरमममलं धर्ममार्गावतारम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१६।।

छेदं भेदं यदि वितनुते तस्य देहस्य कश्चित्,
नूनं तस्मात् जिनवचनतो, नैव किञ्चिच्चलेत् सः।
धर्मे स्थैर्यं प्रसरति तदा, शुध्दशिष्यस्य नित्यम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१७।।

इत्याद्यैः स्याद् सुगुरुचरणे, यः समुपस्थितिस्थः,
वर्यः शिष्यः प्रवचनपटु, नूनमेषो भवेत् स।
संपद्यन्तां भवजलपथे तस्य मोक्षप्रयाणः,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१८।।

योऽन्त्यः प्रोक्तो गुणगणपतिः शिष्यधर्मेसुधुर्यः,
कुर्यात् योगैस्त्रिविधविषयैः, सद्गुरुणां च सेवां।
प्राप्नोतिद्राक् सुगुणतिलकं श्री समुपस्थितिं स,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।१९।।

सत् शिष्याणां गुरुगुणगणे पञ्चयुक्तैर्दशैर्यः,
भक्त्या प्रोक्तः शुभगुणलवः यः प्रधानस्तु तत्र।
अन्त्यो मुख्यो चरमपददः सर्वसद्भावदाता,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२०।।

नेत्रे वक्त्रे तनुषुवदनं, चन्द्रिका सौम्यचन्द्रे,
सौरभ्यं यद् प्रवरकमले तेजसां वर्य सुर्यः।
भूपे रामः नभसि दिनकृत्, स्याद् मरिचिश्चभक्ते,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२१।।

साधौ क्षान्तिः सुरगिरिवरः, स्यान् नगेषुप्रशस्यः,
पर्वे प्रष्टे भवभयहरो, वार्षिकः स्यात्तथैव।
तद्वत् शिष्ये प्रवरसुगुणे स्यात् समुपस्थिति र्यः,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२२।।(युग्मम्)

सन्मार्गे यः प्रचलति वरः सार्वसाधौ सुभक्तिः,
स्वस्योद्धारे नहि विरमते, सद्गुरुं नैवलुम्पेत्।
त्रिसन्ध्यं यां रचयति मुदा, भावभक्त्या सुपूजाम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२३।।

गुर्वाज्ञां यो भजतिमनसि जीवनाधारभूताम्,
एकंपादं न चलति कदाऽज्ञाविरुध्दे नु मार्गे।
सेवे नित्यं चरणकमलं सद्गुरुणां च प्रीत्या
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२४।।

तत्वं सर्वं हृदयभवने, स्थापयेत् तत् प्रभावात्,
योगाः सर्वे निजहितकराः, संभवन्ति सुशुद्धाः।
तस्मात् सर्वा गुणगणनिधिः शोभते तं विना न,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२५।।

सिद्धांते यो निगदितगुणः, शस्यशिष्यत्वभावः,
अत्रप्रोक्तश्चरणधनदः स सदाचारपूर्णः।
सःसंप्राप्य प्रवरसुगुरुं, संलभेत् सद्गुरुत्वम्,
चारित्रं तं भजत सुजनाः पापसंतापहारम्।।२६।।

(शिखरिणी)
मया शिष्ये प्रोक्तः, सुगुणप्रकरः, सच्चरणजः,
गुणैर्कोटिप्राप्तः, सुगुरुचरणे, यो विनयतः।
ततः संप्राप्नोति, श्रुतगुणनिधेः पारमसमम्,
पुनः ''श्रेयः'' सद्मा परमसुखदं ''दर्शन''पथम्।।२७।।

स हि मानवः, यः खादयित्वा खादति।

# ।। जिनेश्वराणां परिमितदानविचारः।।

- पद्मकीर्तिविजयो मुनिः

केचित् शास्त्राभिप्रायाऽपरिज्ञानवन्तो ब्रुवन्ति यत् - जिनेश्वरो न महान् यतः जिनेश्वरैः परिमितमेव दानं दत्तम्, श्रूयते हि-

तिन्नेव य कोडिसया अट्ठासीअं च हुंति कोडिओ।
असियं च सयसहस्सा एवं संवच्छरे दिन्नं।।
तदपेक्षया बोधिसत्वगौतमेन अपरिमितं दानं दत्तम् यदुक्तम्
''एते हाटकराशयः प्रवितता, शैलप्रतिस्पर्द्धिनो,
रत्नानां निचया स्फुरन्ति किरणैराक्राम्य भानोः प्रभाः।
हाराः पीवरमौक्तिकौघरचितास्ताराबलीभासुरा,
यानादाय निजानिव स्वगृहतः, स्वैरं जनो गच्छति।।''

तस्मात् अपरिमितदानदातृत्वेन बोधिसत्वस्य विभूतिमत्वं औदार्यं च अस्ति, जिनेश्वरो परिमितदानदातृत्वेन विभूतिमत्वौदार्याभावाभ्यां न महान्।

तन्न, यद् जिनेश्वरैः परिमितं दानं दत्तं, तद् न अर्थाभावाद्, यतः 'वरं वृणुत' इत्युद्घोषणापूर्वकमेव तै र्दानं दत्तं, किन्त्वर्थिनामभावेनैव दानं परिमितं जातम्। अर्थ्यभावत्वं च भगवत्प्रभावेण, याचकानां सोपक्रमनिरुपक्रमधनादानवाञ्छाजनक कर्मप्रभावेण च धनादानवाच्छा एव न स्यात्, परिमितधनवाञ्छा वा स्यात् यतः भगवत्- प्रभावेण याचकाः संसाराऽसारवत्वज्ञानेन संतोषभागित्वाज्जिजिनेश्वराणां दानं परिमितं जातम्। ननु यदि याचकाः संतोषिणस्तदा परिमितमपि दानं न स्यात्? तन्न संतोषत्वं हि न धनमात्रानादानभाववत्वं, अपि तु परिमितधनादानवत्वमपि संतोषत्वं स्यात्, तस्मात् परिमितधनादानवाञ्छावान् परिमितमेव धनं गृण्हीयात् अथवा देवताशेषमिव संवत्सरमात्रेण प्रभूतप्राणीग्राह्यत्वाद् युक्तमेव परिमितं दानम्।

ननु जिनेश्वरेण अकृतकृत्यत्वेन दानं दत्तं, यतः दानं ''विशिष्टफलापेक्षया एव प्रवर्तते'', दानेन काऽपि वाञ्छा भवति तेन जिनेश्वरोऽपूर्णस्पृहावत्वेनाकृतकृत्यत्वात् न महान् । तदपि न युक्तमाभाति। तीर्थकरत्वं तीर्थंकरनामकर्मोदयाज्जायते तद् सांवत्सरिक दानादिक्रमेणैव फलं दर्शयति, तेन जिनेश्वरः स्वाचारपालनत्वेन दानं यच्छति न तु स्पृहावत्वेन, अतो जिनेश्वरो न महान् इति मतं तु मोहविजृम्भितमेव।।

# श्री ऋषभ अष्टकम्

– राजदर्शन विजयोमुनिः (डेहेलावाळा)

## वसन्ततिलका छन्दः -

तुभ्यं नमः प्रथमभूमिपतीश्वराय,
तुभ्यं नमः प्रथमभिक्षुपतीश्वराय,
तुभ्यं नमः प्रथमशैलपतीश्वराय,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।१।।

तुभ्यं नमस्सकलभोगविवर्जकाय,
तुभ्यं नमस्सकलरोग–निवारकाय,
तुभ्यं नमस्सकलयोगनिरोधकाय,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।२।।

तुभ्यं नमोऽस्त्वखिलशर्मनिमज्जकाय,
तुभ्यं नमोऽस्त्वखिलधर्मनिदर्शकाय,
तुभ्यं नमोऽस्त्वखिलकर्मनिकारकाय,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।३।।

तुभ्यं नमः किल जिनेन्द्र ! सुखोत्सवाय,
तुभ्यं नमः कृतसुरेन्द्रमहोत्सवाय,
तुभ्यं नमः कृतनरेन्द्ररथोत्सवाय,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।४।।

तुभ्यं नमः समदृशे विजने जने वा,
तुभ्यं नमः समृदशे द्युमणौ तृणे वा,
तुभ्यं नमः समदृशे हननेऽर्चने वा,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।५।।

तुभ्यं नमः परमशान्तिमहाधनाय,
तुभ्यं नमः परमकान्तिनिकेतनाय,
तुभ्यं नमः परम ! जातिविशोधनाय,
तुभ्यं नमः प्रथमतीर्थपतीश्वराय ।।६।।

तुभ्यं नमो दलितमोहनराधिपाय,
तुभ्यं नमो दलितरागमृगाधिपाय,
तुभ्यं नमो दलितरोषगजाधिपाय,
तुभ्यं नमो प्रथमतीर्थपतीश्वराय ।।७।।

तुभ्यं नमः प्रथित''राज''दिवाकराय,
तुभ्यं नमो निचितकर्मतमोहराय,
तुभ्यं नमो द्विविधधर्मकथाकराय,
तुभ्यं नमो प्रथमतीर्थपतीश्वराय ।।८।।

# ।। श्री शत्रुंजयस्तुति ।।

– 卐 ज्ञानभूषणविजयो मुनिः

विश्वे तीर्थान्यनेकानि, तीर्थाणामल्पता नहि।
सिद्धगिरेः समं तीर्थं, नास्ति विश्वे कदाचन।।१।।

तं गिरिं प्राप्यः निवार्णं, प्राप्ताः कोटी मुनीश्वराः।
जगदाधारमादीशं, ध्यायामि गिरिभूषणम्।।२।। (युग्मम्)

सिद्धाद्रि–पुष्पदन्ताद्रि–पुण्डरीकाद्रि–शाश्वताः।
शत्रुंञ्जय–विमलाद्रि–सुराद्रिप्रमुखाः पुनः।।३।।

अष्टाधिकशतं यस्य, गिरेः संज्ञाः प्रकीर्तिताः।
जगदाधारमादीशं, ध्यायामि गिरिभूषणम्।।४।। (युग्मम्)

सौराष्ट्रे गिरिराजोऽस्ति, जिनराजोऽस्ति तद्गिरौ।
महापापोऽधमोऽप्यहं, तितीर्षु र्भववारिधिम्।।५।।

श्रुतं मया तु तत्तीर्थं, पोतोऽस्ति भवसागरे।
जगदाधारमादीशं ध्यायामि गिरिभूषणम्।।६।।

त्रिलोकीभूषणं देवस्–तत्तीर्थे विमलाचले।
राजत आदितीर्थेशस्–त्रिलोकतारकः प्रभुः।।७।।

दृष्ट्वा प्रभोर्वपुष्कान्तिं, चित्रीयन्ते सुरा अपि।
जगदाधार मादीशं ध्यायामि गिरिभूषणम्।।८।।

ध्यायन्ति तीर्थनाथं य–आषण्मासं निरन्तरम्।
प्राप्नुवन्ति समन्तात् ते, दिव्यतेजोमहाप्रभाम्।।९।।

---

卐 पू.आ. मुक्तिप्रभसूरि विरचित' **तीर्थो जगतमां** इत्यादिपदाया स्तुत्या अनुवोदाऽयम्

करोति तेषामिष्टं च, कष्टनाशं चक्रेश्वरी।
जगदाधारमादीशं ध्यायामि गिरिभूषणम्।।१०।।

भक्तानां पङ्क्तिमध्ये त्वं, मां न विस्मरतात् प्रभो !।
आगतो दर्शनार्थं ते, दूरदेशादहं प्रभो !।।११।।

क्षणात् ते दर्शनेनाऽपि, नरीनृत्यति मे मनः।
जगदाधारमादीशं ध्यायामि गिरिभूषणम्।।१२।।

यातो नेत्रे ममोल्लासं, दृष्ट्वा मुखं तव प्रभो !।
कर्णौ प्रोल्लसितौ मेऽद्य, श्रोतुं गिरं तव प्रभो !।।१३।।

समुल्लसन्ति मेऽङ्गानि, त्वामाश्लेष्टुं सदा प्रभो !।
जगदाधारमादीशं ध्यायामि गिरिभूषणम्।।१४।।

दृष्टवा त्वत्तेजसो दिव्य-प्रभावमद्भुतं कलौ।
प्रार्थये देहि भक्तिं ते, सेवकाय भवे भवे।।१५।।

मुक्त्यंशुज्ञानसज्ज्योति-स्त्वद्भक्त्या हृदि मे ज्वलेत्।
जगदाधारमादीशं ध्यायामि गिरिभूषणम्।।१६।।

संसारो नाम पञ्चेन्द्रियविषयाणां पराधीनता,
क्रोध-मान-माया-लोभानां च कषायाणामाधीनता ।।

# निष्फलता सफलताया जननी

- प्रशमरक्षितविजयो मुनिः

निष्फलताभयस्तु कार्यस्य सफलताऽवरोधकं महत् परिबलमस्ति। निष्फलताभीरुर्जनो नाऽऽरोहेत् प्रायः सफलतासोपानम्। ततः कार्यप्रारम्भात् प्राक् तेन यत्र तत्र वा सर्वत्र दृश्यते निष्फलता। निष्फलताभयस्तु निवृत्तिपरिणामरुप एव। कस्यचिदनुरोधेन प्रारब्धं कार्यमविमृश्य जहाति स निष्फलताभीरुस्तु। सफलताभिलाषिणा तु दूरीकरणीयः प्रथमतो निष्फलताभयः। तद्भयापगमनाद् भवत्येव सफलताप्रेरकः प्रयासोऽवश्यमनायासेन।

नास्ति कोऽपि जीवो जगति प्रायः, नालभत निष्फलता यः स्वस्य जीवने। पश्यत व्यवहारेऽपि बालश्वलनक्रियां विदधानः चलति शनैः शनैः, पतति च गत्वा गत्वा द्वित्रिपदं, चलति च पुनरुत्थाय, पतति च पुनर्द्वित्रिपदं स्खलित्वा, पुनरुत्तिष्ठति च, एवं कुर्वन् बालोऽन्यदा समर्थीभवति गन्तुं शतपदान्यस्खलितगत्या।

भवतु वक्ताऽपि श्रोतृजनवर्गं चमत्कुर्वन्, तथापि तस्य स्वजीवनेऽपि भवत्येव नेकधा निष्फलता। तावत्तु प्रवचनकरणावसरे समुपतिष्ठति सति प्रवचनात् पूर्वं स्खलनादिचिंताकुलतया चित्तं 'कुत्रतः प्रारब्धव्य' मित्यादिनानाविधविचाराञ्चितं भवेत् तद् वक्तुं जनसभामध्ये तदा तु हस्त-पादाद्यङ्गानि कम्पेरन्, नेत्रयोश्वान्धता प्रकटयेत्, यथावन्नोच्चारयेत् स्वौष्ठपुटाभ्यामपि शब्दान्, निक्षरेत् खलु प्रस्वेदजलमपि स्पष्टं तस्य शरीरात्. एवं भवन्नपि प्रयत्नमपरिहाय य उत्सहेत, स स्याज्जगत्यद्वितीयो वक्तृपङ्क्तिमुख्यो वक्ता।

वर्तमानकालेऽपि देश-राज्यादिमन्त्रिपदाधिकारिणां जीवनेऽस्ति विकल्प एवंविधः। अनेकश श्चुण्टणीपदप्रचारं विधायाऽपि पराजयेद् यदि, तथापि न विरमति चुंटणीप्रचारात्, पराभूयाऽपि स स्वसभ्यजनानाह्वयेत्, आहूय च मन्त्रयेत् तैः सह चुंटणीप्रचारादिकृत्यानि, यत् केन हेतुना चुंटणीपदं हारितमिति। तान् तान् हारहेतून् सम्यगवगम्य ''मा भूत् क्षतिः पुनरेतादृशी'' तत्कृतेऽतीव प्रयतेत, एवं रीत्यापि सफलता प्राप्यते न वा?

तथाहि श्लोककंठस्थीकरणे, संस्कृत-प्राकृतप्रमुखभाषाप्रभुत्वे, काव्यसर्जने, लेखने, पाठने-धनाद्यवाप्तौ-कन्दुकादिखेलने ज्ञेयमेतदेव। अतो निर्णयेद् यद्, भवेदाध्यात्मिकमार्गे वा भौतिकमार्गे यः कोऽपि पुरोगामी, तत्रावगणयेद् निष्फलताभयं प्रथमतः, सफलतालक्ष्यं च पुरस्कृत्य तत्प्रापकोपायान् निरपायानेव मृगयेत् भवत्येव सफलताजनकः सोऽवश्यमिति अस्तु...

# आर्यत्वमिदं रमणीयतरम्

– गूर्जरमूलम् : डॉ. शरद ठाकरः
– अनु. देवार्यः

पत्रमालिख्य डॉ. निमित्तः नाणावटी पुनरपि सकृत् स्वीय एव लेखने दृष्टिमस्थापयत्। तथाहि – पूज्यतात! विषयमेतज् ज्ञात्वा भवान् दुःखी भविष्यति, आतङ्कभावं च प्राप्स्यति। किन्त्विदानीं स प्राप्तः कालः, यस्मिन् मया अत्रत्या स्थिति र्यथार्थतया भवते निवेदनीयैव। कियता कष्टेन भवद्भ्यामऽहं यावत् ''डॉक्टर'' पदवीं प्रापित इति सम्यगवगच्छाम्येव। मम सा माता, न कदाऽपि सुंदरां शाटिकामपि धृतवती। ''एम्. बी. बी. एस्.'' पाठनान्तरमग्रे पठितुमनिच्छन्नऽहं कुत्रापि सर्वकारीय उद्योगे स्वं नियोक्तुकामः, किन्तु भवद्भ्यां न सम्मतम्। अहमग्रे ''पोस्टग्रेझुएशन'' समापयम्। मया ''एम. डी.'' पदवी स्वीकृता। तदनन्तरमपि भवद्भ्यामस्माकं देशस्य स्पर्धया कुण्ठिते व्यवहारेऽप्रवेश्याअत्यधिकोज्ज्वलाय भविष्यायात्र प्रेषितोऽहम्। युष्मद्वन्मम मनस्यपि एवमेवासीत्, यत् ईंगलेन्डदेशेऽहं मनोनीतं ''जोब'' कार्यं रणरणायमानं च धनमवश्यं प्राप्स्ये। किन्तु अत्रागत्य सम्यग्बोधोऽभवत्, **''यद्भूधराः दूरा दर्शनीयाः''** इति। डॉक्टरेषु निर्गतिकत्वं प्रतिदिनं वर्धमानमेवास्ति। आङ्ग्लाः मुखेन नोच्चारयन्तु नाम, किन्तु तेषां मनसि स्थितो रङ्गभेदो वर्तने त्वनुभूय त एव। आदशमासं भिन्नभिन्ननगरे भिन्नभिन्नचिकित्सालये शताधिकसप्तत्रिंशद् वारमावेदनं कृतवानस्मि। आ ''स्कोटलेन्ड'' नगरात् ''दक्षिण–इंगलेन्डं'' यावत् तादृशमेकमपि नगरं नास्ति, यत्राहमावेदनं न कृतवान् किल। किन्तु संप्रति मदीयं धैर्यं च्यवमानमस्ति। सहाऽऽनीतानि रूप्यकाण्यऽपि क्षीयमाणानि सन्ति। यत्र धन– ? देयाऽतिथिरूपेण (गेस्ट) वसामि–जिमामि च, तस्मा अर्पणायाऽपि ''पाउन्ड'' नास्ति मम पार्श्वे। अथ अलम्... ''नो मोर्..''। अद्य चेत साक्षात्कारे (इन्टरव्यू) नकारं श्रुणुयाम्, तदनन्तरं अस्मिन् देशे वसनस्येच्छा नास्ति मनसि। कुत्रचिदपि यादृशीं–तादृशीं काङ्क्षावृत्तिं स्वीकृत्य, भाटकाया पेक्षितं धनमुपार्ज्याऽत्रतो निर्गमनस्यैव मम निर्णयः कठोरस्स्यात् किन्तु अप्रासङ्गिको नास्ति। भवान् सहनां मा त्यजतु। अहं तु पराजित एव। चिन्तां मा धारयेति मातरं वदतु। भारतेऽहमुदरपूरणाय यावदावश्यकं तावत् तु कथमप्यर्जयिष्याम्येव।

लि. भवतः पराजितस्य पुत्रस्य निमित्तस्य वंदनानि–इति।

यावत् पत्रं समाप्तिं गतम्, तावत् तु डॉ. निमित्तस्याऽक्षिण्यश्रूपूर्णे जाते। अस्मिन् पत्रे तेन यल्लिखितमासीत् तस्मिन् वास्तविकप्रपञ्चस्तु लवमात्रमेवाऽऽसीत्। तथापि पत्रं पठित्वा पितरा वश्रूणि श्रावयिष्यत एवेति तस्याऽन्तःकरणं वददासीत्। किन्तु किं कर्तव्यम्? नोऽन्यः कोऽपि मार्गोऽवशिष्टः। स्नेहिजनानां लज्जया परदेशे निर्गतिकत्वेनाऽवस्थानेनाऽपि न किमपि सिद्ध्यते।

डॉ. निमित्तः पत्रसङ्केतमलिखत्। तदनन्तरं वस्त्राणि परावर्त्य द्वारमकीलयत्। अद्यापि साक्षात्कारार्थं समयोऽवशिष्ट आसीत्। किन्तु याने तैलं पूरयितव्यमासीत्, पत्रं पत्रालये प्रापणीयमासीत्, सुपिष्टकखाद्यं (ब्रेड) क्रेतव्यमासीत्। तथा च दशगव्यूतदूरे साक्षात्कारस्थले गन्तव्यमासीत्। पुरातने गलितावयवे द्वितीयहस्तक्रीते यान उपविश्य – स निर्गतवान्।

चत्वर एवेन्धनस्थानकमासीत्, तत्र त्रीणि वाहनानि यथाक्रमेण स्थितान्यासन्। तत्रत्याचारोऽस्मदीयस्य भारतदेशस्येव न, यद्भवान् यान एवोपविष्टो भवेत्, संस्थायाः कर्मकर आगत्य युष्मदीये याने तैलं पूरयेच्चेति। तत्र त्वशेषो देशस्स्वयंसेवायास्सिद्धान्तमवलम्ब्य व्यवहरति। प्रत्येकेन वाहनचालकेन स्वेनैव यानादवतरणीयम्, तैलस्य नालिकां स्वहस्तेन गृहीत्वा तैलसञ्चिकायां तैलं पूरणीययञ्च। तस्य मूल्यञ्च यथास्थाने स्थापनीयम्। तथा च सर्वमपि कार्यं त्वरया स्राक् च कर्तव्यम्। समययापनं शिथिलता च नाऽर्हतः। पश्चात् स्थिता वाहनचालका अनुच्चार्य, ध्वनिवादकञ्चाऽनुत्त्वाऽपि त्वरतां दर्शयन्त एव भवन्ति।

डॉ. निमित्तस्य क्रम आगतः। तेन तैलं पूरितम्, तदनन्तरं स्वीयं यानमीषदग्रेऽचालयत्। तावत् पृष्ठात् किमपि लपलपनस्य शब्दः तस्य कर्णे पतितः। ततः सः पृष्ठभागदर्शके दर्पणे दृष्टिमायोजयत्। एकस्मिन् बहुमूल्ये ''मर्सिडिस्'' कारयाने कौचिद्वृद्धदम्पत्युपविष्टेऽऽस्ताम्। पुरुषस्य वयोऽधिकाशीतिर्ज्ञायमानमासीत्। तेन सह समानवयाएव तस्य भार्याऽऽसीत्। वृद्धपुरुषः स तैलपूरणाय यानादधस्त्ववतीर्णवान्, किन्तु सरलतया स्थातुं नाऽशक्नोत् सः। अङ्गानि वेपनमनुभवन्त्यासन्। तस्य हस्तयो स्तावती क्षमताऽपि नासीत्, तथा च तैलपूरकं यन्त्रमप्याधुनिकमासीत्। किं कर्तव्यता तमावृणोत्।

आयासमनुभूय स पृष्ठक्रमे कार्याने स्थितं युवानं व्यजिज्ञपत् ''विल् यु बी काईन्ड ईनफ् टु हेल्प मी, माय सन्'' ! (वत्स ! किं त्वं मम साहाय्यं करिष्यसि वा?) एक एव न, याने चत्वारः युवान उपविष्टा आसन्। चत्वार अप्याऽऽङ्गलास्तेषु त्रयो हसितुं लग्नाः, चतुर्थे नर्मवचनमवोचत्। यदि भुजयोः तैलपूरणस्य क्षमता न विद्यते तर्हि बहिः किमर्थं निर्गच्छसि भो? वृद्धायास्सह गृह एव वसने किं विनश्यति जातक !''

वराकः वृद्धः !!! तान् विहाय तस्याऽपि अनुस्थाने स्थितस्य यानस्य अभिमुखमसरत्। किन्तु तस्मिन् तु द्वा अश्वेतौ हबसीपुरुषा उपविष्टावास्ताम्। ताभ्यां एको अरुणे नेत्रे दर्शयन् मुखं व्यदारयत् ''है...ई...यू...ओल्ड फुल् ! गेट् आउट् ओफ् धी वे। वी आर गेटिंग लेट्...'' (अपि...! जीर्णगात्र ! मार्गादपसर, विलम्बो भवत्यस्माकं) तस्य हिंसात्मकं वाक्प्रलापं श्रुत्वैव वृद्धो भीतः। स्वीयं यानं मार्गादपसारयितुं स प्रतिवलितः। किमेतद्? तत्र तेन यद् दृश्यं दृष्टम्, तद् दृष्ट्वा स विस्मित

एवाभवत्। डॉ. निमित्तः स्वीयात् यानादवतीर्य वृद्धस्य ''मर्सिडिस्'' कारयाने तैलं पूरयन्नासीत्। स्वयमेव यानं चालयित्वा एकतः स्थाने स्थगयित्वा, ततो वृद्धं व्यजिज्ञपत्, ''प्लीझ् ! टेईक योर् सीट सर् ! केन आई डु एनिथिंग मोर् फोर् यु?'' (कृपयाऽऽसनमलङ्कियतां महोदय! कामन्यां परिचर्यां कुर्वेऽहम्?)

वृद्ध–वृद्धायाश्चत्वार्यपि नयनानि बाष्पाऽऽकुलान्यभवन्। वृद्धोऽपृच्छत् 'कुत्र वास्तव्यो वत्स! भारतीयोऽसि वा?

आम् ''सर्''! भवता कथं ज्ञातं? मम त्वक्वर्णेन खलु? 'न मम पुत्रक ! त्वक्वर्णेन तु तावदेव ज्ञायते, यत् त्वं 'एशियन्' भविष्यसि। अत्र सर्वानपि 'एशियन्' जनान् वयं ''पाकी'' शब्देन संबोधयामः। किन्तु ऋते भारतात् 'एशिया' खंडस्य नैकतरोऽपि देश एतादृशान् सुसंस्कारयुतान् पुत्रान् जनयति। वृद्धस्य मुखगताषु वलीषु प्रेमयुतं स्मितं पर्यङ्कितम्।

''माय् सन् ! आई एम मि. फ्रेडरिक् विल्सन्'' (मत्पुत्रक ! अहमस्मि मा. फ्रेडरिक् विल्सन्) अहं ब्रिटनराज्यस्य संसदसभ्यः। मदर्हं किमपि कार्यं चेत्...अस्मिन् देशे कुत्रापि तवाऽसुविधा चेत्...कुत्राप्युत्तम ''जोब'' कृते संस्तुत्या आवश्यकता चेत्...निःसङ्कोचं वद तावत्। त्वमपि जानीयाः यदस्मिन् लंडने नगरे वृद्धस्य अस्य कियान् प्रभावोऽस्ति खलु।'

तावत् डॉ. निमित्तस्य हस्ता ऊरुकस्य कोषस्थं पत्रं दारयितुं त्वर्यमाणा आस्ताम्।

आदशकद्वयात् डॉ. निमित्तनाणावटी ईंग्लेन्डदेशे वसति। वृद्धस्य संस्तुत्या उत्तमचिकित्सालये स उद्योगमलभत। यत् कार्यं पदव्या न भवति, तत् कार्यं कदाचिद्युष्मदीयैः संस्कारैः भवति।

गृहस्थाश्रमो नामारम्भास्पदम्।
गृहस्थजीवनं किं शक्यम्
षड्जीवननिकायारंभेन विना।

# आगमसाहित्यं प्रकरणसाहित्यं च

*– मूललेखकः – देवर्धिः
अनुः – साध्वीजी श्री विरागदर्शनाश्रीः

आगमसाहित्यस्य नवरचना भवितुं न शक्नोति। आगमसाहित्यस्य रचना यस्मिन् कालेऽभवत्, तस्मिन् काले कण्ठस्थग्रन्थस्य परंपराऽभूत्। समये समये आगमसाहित्यस्य परिष्करणं बभूव।

श्वेताम्बरमूर्त्तिपूजकपरंपरानुसाराऽऽगमग्रन्थानां विषयपरिवर्तनं कदापि नाभूत्, किन्तु आगमग्रन्थानां सूत्राणां पाठस्य निर्धारणं कृतमस्ति। वीरनिर्वाणात् १६० षष्ट्यधिके शततमे वर्षे आचार्यश्री–भद्रबाहुसूरिमहाराज–सान्निध्ये आगमग्रन्थसूत्राणां वाचना भूताऽऽसीत्। कण्ठस्थागमग्रन्थानां शाब्दिकरचनायाः सर्वाङ्गीणशुद्धिकरणस्य एषः प्रथमः प्रयास आसीत्। भगवतो महावीरस्य निर्वाणस्य पश्चात् एकदा द्वादश वर्षीये–दुष्काले आगमग्रन्थानां अध्ययनशीलः श्रमणवर्गो भारतदेशस्य विभिन्नराज्येषु विभक्तः। दुष्कालस्य समाप्तेः पश्चात् पाटलिपुत्रपत्तने सर्वश्रमणानां संमेलनमभूत्। कण्ठस्थागमग्रन्थेभ्यः केषाञ्चिद् ग्रन्थानां पाठा अत्रुट्यन्, अतः श्रीभद्रबाहुसूरिजी–महाराजः सर्वागमग्रथानां मूलपाठस्य निर्धारणमकृत। तदा सर्वे आगमग्रन्थाः कण्ठस्थाः आसन्। तै र्निर्धारितसूत्रपाठः सर्वमान्योऽभूत्।

वीरनिर्वाणसंवत् ८२७–८४० मध्ये पुनः एकदा १२ वर्षदुष्कालेन श्रमणवर्गो विभिन्नराज्येषु विजहार दुष्काल–समाप्तेः पश्चात् श्रमणवर्गस्य द्वे संमेलने जाते। एकं संमेलनं मथुरायां अभूत्। तस्याध्यक्षस्थाने श्रीस्कंदिलाचार्यो अभूत्। द्वितीयसंमेलनं वल्लभ्यामभवत्। तत्राध्यक्षः श्रीनागार्जुनसूरिजीमहाराजः अभूत्। द्वे संमेलने तुल्यसमये बभूवतुः किन्तु परस्परं कश्चित् संपर्को नाभूत् अतः द्वे अपि वाचने विभिन्ने अभूताम्।

मथुरायाः वाचनायां श्रमणवर्गस्य समीपे यदऽपि कंठस्थं आगम–साहित्यमभूत्, तस्य पाठ–निर्धारणं अभवत्। किञ्चिदागम–साहित्यं नष्टं, तद्वृत्तान्तमपि मथुरायाः वाचनायां स्पष्टमस्ति। मथुरायामागमग्रन्थानां यः पाठो निश्चितः, तं श्री स्कंदिलाचार्यस्य मार्गदर्शनानुसारं श्रमणवर्गः स्वीचकार। वल्लभ्यां या वाचनाऽभूत् तस्यामपि उपस्थितश्रमणवर्गस्य यदागमसाहित्यं कंठस्थमभूत्, तस्य पाठ–निर्धारणमभूत्। किञ्चिदागमसाहित्यं नष्टं, तद् वृतान्तं वल्लभ्याः वाचनायामपि स्पष्टं बभूव। वल्लभ्यां या वाचना भूता, तस्यां कण्ठस्थानां आगमानां लेखनमभूत्। श्रीनागार्जुनसूरिजीमहाराजस्य मार्गदर्शनं मुख्यमभूत्।

वीरनिर्वाणसंवत् ९६० पश्चाद् १२ वर्षीयदुष्कालानन्तरं श्रमणवर्गस्य संमेलनं पुनः वल्लभ्यां भूतम्। वल्लभ्यां तद् संमेलनं द्वितीयमभूत्। तत्संमेलनस्य अध्यक्षः श्रीदेवर्धिगणिक्षमाश्रमण

* **'आगमसंबंधी साहित्य'** इति देवर्धिना हिंदीभाषायां लिखितस्य पुस्तकस्य (चौखम्बा–वि.सं.२०६३) संस्कृतानुवादोऽयम्।

आसीत्। सा वाचना ऐतिहासिकी भूता। संपूर्णग्रन्थसाहित्यस्य अक्षरशः लेखनस्य निर्णयोऽभूत्। पुरातनवाचनायाः अक्षरपाठानां विमर्शोऽभूत्। मथुरावाचनायाः पाठाः 'स्कंदिलीवाचना' इति, तथा पुरातनवल्लभीवाचनायाः पाठाः 'नागार्जुनीवाचना' ते द्वे वाचने प्रसिद्धे अभूताम् द्वितीयवल्लभीवाचनायां आगमलेखनं भूतम्, तस्यां वाचनायां मथुरावाचना मुख्याधारा मता। पाठभेदे सति विभिन्नपाठान् लिखित्वा अज्ञाप्यत, यथा 'एष पाठो नागार्जुनीवाचनायाः विद्यते। आगमलेखनस्य बृहत् पुरुषार्थस्य पश्चात् द्वौ लाभौ प्राप्तौ, एकः- आगमपाठानां नव्य-पाठभेदस्य संभावना नामशेषा भूता। द्वितीयः विस्मरणस्य विलोपस्य च भयं मन्दीभूतम्।

वल्लभीपुरे आगमलेखनस्य कार्ये संपन्ने। श्रमणवर्गोऽचिन्तयच्च कश्चिद्विषयः ग्रन्थस्थः नासीत्, किन्तु परंपरागतक्रमेण अधीयते स्म, तं ग्रन्थबद्धं कर्तुं, ततः नूतनग्रंथरचनाऽत्यन्तमावश्यकी, अतो नूतन ग्रन्थानां रचना प्रारब्धा स्तैर्गीताथैः।

आगमग्रन्थानां लिखितावतारेण आगमग्रन्थानां पठनं सरलं भूतम्। यो ग्रन्थो गुरुमुखेन श्रुत्वा स्मर्यते स्म, स ग्रन्थोऽलिख्यत, ततो ग्रन्थानां स्वाध्यायः व्यापकीभूतः। यः साधुः कंठस्थं कर्तुं समर्थः, स कंठस्थं कृत्वा आगमग्रंथानामभ्यासं कुर्वन्नाआस्ते। यः कंठस्थं कर्तुं न समर्थः, स पठनं कुर्वन्ना आस्ते। प्राकृतभाषायां विरचितानामागमसूत्राणामर्थो रहस्यार्थश्च बोद्धुं विवरणग्रन्थानाम पेक्षा विशेषतो जाता। आगमलेखनस्य विशिष्टा फलश्रुतिरधुनावाप्ता, आगमग्रन्थेषु समृद्धघटीकालेखनारंभः अभूत्। आगमिकसाहित्यस्य परंपरायां निर्युक्ति-चूर्णि-भाष्यानां स्थानं महत्वपूर्णमस्ति।

टीकाः विशेषस्थानं आददत, यतो लेखनपद्धतिरुपलब्धासीत्। टीकाकारा विषय-विस्तारं कर्तुं पर्याप्तं अवकाशं अलभन्त। संस्कृतभाषायाः प्रचलनं टीकाभिः प्रचुरमभवत्। आगमग्रन्थानां टीकाकाराणां सूची ज्येष्ठा अस्ति।

विक्रमस्य अष्टम-शताब्दौ श्रीहरिभद्रसूरिजीमहाराजोऽनुयोगद्वारसूत्र-नन्दीसूत्र-प्रज्ञापनासूत्र-आवश्यकसूत्र-ओघनिर्युक्तिसूत्र-जंबूद्वीपप्रज्ञप्तिसूत्र-जीवाजीवाभिगमसूत्रे-त्याद्यागमग्रन्थेषु टीका व्यरचयत्। विक्रमस्य दशमशताब्द्यां श्रीशीलाङ्काचार्य आचाराङ्ग-सूत्रकृताङ्ग सूत्रयोष्टीके अलिखत्। विक्रमस्य एकादशमीशताब्द्यां श्री शांतिसूरिजी महाराजः उत्तराध्ययनसूत्रे टीकां व्यरचयत्। विक्रमस्य द्वादशशताब्द्यां श्रीअभयदेवसूरिजीमहाराजो ज्ञाताधर्मकथासूत्र-स्थानाङ्गसूत्र-समवायाङ्गसूत्र-भगवतीसूत्र-उपासक-दशासूत्र-अन्तकृद्दशासूत्र-अनुत्तरौपपातिकसूत्र-प्रश्नव्याकरणसूत्र-विपाकसूत्र-औपपातिकसूत्र-प्रज्ञापनासूत्राणां टीकाः विदधे। मलधारिणा श्री हेमचन्द्रसूरिजीमहाराजेन विशेषावश्यकसूत्र-आवश्यकसूत्र-अनुयोगद्वारसूत्र-नन्दीसूत्राणां टीका व्यरचि। विक्रमस्य त्रयोदशमशताब्द्यां श्रीमलयगिरिसूरिजी महाराजः आवश्यकसूत्र-ओघनिर्युक्ति-चन्द्रप्रज्ञप्तिसूत्र-जीवाजीवाभिगमसूत्र-ज्योतिष्करंडक-नन्दीसूत्र-पिण्डनिर्युक्ति-प्रज्ञापनासूत्र-बृहत्कल्पसूत्र-पीठिका-भगवतीसूत्रद्वितीयशतक-राजप्रश्नीयसूत्र-व्यवहारसूत्राणां टीकाः व्यरचयत्।

अन्य-प्राचीनटीकाकारेषु श्रीद्रोणाचार्य-श्रीनमिसाधु-श्रीवीरगणिजी-श्रीचन्द्रसूरिजी-तिलकाचार्य-श्रीक्षेमकीर्तिसूरिजी- श्रीज्ञानसागरसूरिजी- श्रीकुलमंडनश्री आदीनां नामानि मुख्यानि

सन्ति।

अर्वाचीनसमयेऽपि ग्रन्थकाराः आगमग्रन्थानां टीकाः लिखन्ति।

तत्र श्वेतांबरमूर्तिपूजक- परंपरायाम्-

१) श्री मुक्तिविमलजी म. - कल्पसूत्र टीका

२) श्री धर्मधुरंधरसूरिजी म. - भगवतीसूत्र प्रशस्तिटीका

३) श्री कुलचन्द्रसूरिजी म. - १) आचारांगसूत्र टीका २) सूत्रकृतांग टीका ३) कल्पसूत्र टीका

४) श्री कल्याणबोधिसूरिजी म. - १) ऋषिभाषित टीका २) अंगचूलिका टीका ३) वर्गचूलिका टीका ४) सूत्रकृतांग द्वितीय संग्रहणी टीका

• दिगम्बर परंपरायाम्:-

दिगम्बर परंपरायाः मान्यता अस्ति यद् मूलागमानां विच्छेदो भूतोऽस्ति, अत आगमसंबंधि साहित्यं दिगम्बरपरंपरायां उपलब्धं नास्ति।

• स्थानकवासी परंपरायाम्-

१) श्री घासीलालजी महाराजेन स्वसंप्रदायमान्यतामवलम्ब्य ३२ सूत्राणामेवटीकाः लिखिताः - १आचाराङ्गसूत्र टीका. २ सूत्रकृताङ्गसूत्र टीका. ३ स्थानाङ्गसूत्र टीका. ४ समवायांङ्गसूत्र टीका. ५व्याख्याप्रज्ञप्ति टीका. ६ ज्ञाताधर्मकथा टीका. ७ उपासकदशा टीका. ८ अन्तकृद्दशा टीका. ९अनुत्तरौपपातिक टीका. १० प्रश्नव्याकरण टीका. ११विपाकसूत्र टीका. १२ औपपातिक टीका. १३राजप्रश्नीय टीका. १४ जीवाजीवाभिगम टीका. १५ प्रज्ञापना टीका. १६ सूर्यप्रज्ञप्ति टीका. १७चन्द्रप्रज्ञप्ति टीका. १८ जंबूद्वीप प्रज्ञप्ति टीका. १९ निरयावलिका टीका. २०कल्पावतंसिका टीका. २१ पुष्पिका टीका. २२ पुष्पचूलिका टीका. २३ वृष्णिदशांग टीका. २४ उत्तराध्ययन टीका. २५दशवैकालिक टीका. २६ नंदीसूत्र टीका. २७ अनुयोगद्वार टीका. २८ निशीथसूत्र टीका. २९ बृहत्-कल्प टीका. ३०व्यवहारसूत्र टीका. ३१ दशाश्रुतस्कंध टीका. ३२ आवश्यकसूत्र टीका.

२) तेरापंथी परंपरायाम् - श्री महाप्रज्ञश्री म. १) श्री आचारांगसूत्र भाष्यम् (प्राकृत)

(आगमसंबधि साहित्यं लौकिकभाषायां तु पर्याप्तमात्रायां अलिख्यत। आगामानां टब्बार्थ-अनुवाद-विवेचनादि साहित्यं, गुजराती-हिन्दी-अंग्रेजी प्रमुख भाषाया मद्य अद्य मिलति। आधुनिकभाषाणां प्रचारस्य वृद्ध्या संस्कृत-प्राकृतभाषे उपेक्षिते। गुजराती-हिन्दी-अंग्रेजीभाषायां लिखितं आगमसंबन्धि साहित्यं अतिविशालसंख्यायां अस्ति, किन्तु संस्कृत-प्राकृत भाषायां लिखितं साहित्यं अल्पसंख्यायां अस्ति।

प्रान्ते-संमिलितश्वेतांबरमूर्तिपूजक-स्थानकवासी-तेरापंथी परंपराणामागमग्रन्थटीकाः प्रायः ४३ विद्यन्ते।)

# प्रकरणसाहित्य-टीकाग्रन्थाः

आगमेषु विविधविषयानां विश्लेषणं विद्यते। किञ्चिदेकविषयं वैएकाधिकं मुख्यं कृत्वा नूतनग्रन्थो रच्यते, स प्रकरणग्रन्थ उच्यते।

प्राचीनग्रन्थकारा आगमग्रन्थाधारितानेकविधान् ग्रन्थानरचयन्। प्रकरणग्रन्थाः प्राकृतभाषायामपि विद्यन्ते, संस्कृतभाषायामपि च। प्रकरणग्रन्थानां विषयगहनता प्रकरणग्रन्थे टीकां लिखितुं प्रेरयति प्रकरणग्रन्थेषु टीका द्वे विधे मिलन्ति-स्वोपज्ञा अन्यकृता च टीका। अर्वाचीनग्रन्थकाराः प्राचीनप्रकरणग्रन्थेषु टीका व्यरचन्।

## श्वेतांबर मूर्तिपूजक परंपरायाम्

| | | |
|---|---|---|
| १) श्री धर्मसूरिजी म. | – | नवतत्त्वसुमंगला – टीका. |
| २) श्री उदयसूरिजी म. | – | जंबूद्वीपसंग्रहणी – टीका. |
| ३) श्री लावण्यसूरिजी म. | – | १ तत्त्वार्थत्रिसूत्रीप्रकाशिका.<br>२ द्वात्रिंशद्द्वात्रिंशिका – टीका. |
| ४) श्री अमृतसूरिजी म. | – | सर्वज्ञसिद्धि – टीका. |
| ५) श्री दर्शनसूरिजी म. | – | तत्त्वार्थविवरणगूढार्थदीपिका. |
| ६) श्री धर्मधुरंधरसूरिजी म. | – | लग्नशुद्धि – टीका. |
| ७) श्री भद्रङ्करसूरिजी म. | – | ललितविस्तरा – टीका. |
| ८) श्री कुलचन्द्रसूरिजी म. | – | १ विंशातिविंशिका – टीका, २ मार्गपरिशुद्धि – टीका. |
| ९) श्री यशोविजयजी म. | – | १ भाषारहस्य – टीका, २ षोडशक – टीका.<br>३ द्वात्रिंशद्द्वात्रिंशिका – टीका. |
| १०) श्री कल्याणबोधिसूरिजी म. | – | १ सामाचारी प्रकरण – टीका, २ लोकतत्त्वनिर्णय – टीका,<br>३ नानाचित प्रकरण – टीका, ४ उपदेशरत्नकोश – टीका,<br>५ दुःषमगंडिका – टीका, ६ विसंवादप्रकरण – टीका,<br>७ सद्बोधचन्द्रोदय – टीका, ८ इष्टोपदेश – टीका,<br>९ अष्टावक्रगीता – टीका, १० हितोपनिषद्,<br>११ बोटिकोपनिषद्, १२ तत्त्वोपनिषद्,<br>१३ वादोपनिषद्, १४ वेदोपनिषद्,<br>१५ शिक्षोपनिषद्, १६ ज्ञानपंचक विवरण – टीका,<br>१७ अवधूतगीता – टीका, १८ जीवदयाप्रकरण – टीका. |
| ११) श्री हितवर्धन विजयजी म. | – | सम्यक्त्वरहस्य – टीका. |
| १२) श्री गुणहंस विजयजी म. | – | सामाचारीप्रकरण – टीका. |
| १३) श्री रत्नबोधि विजयजी म. | – | धर्माचार्यबहुमानकुलक – टीका इत्यादयः. |

# ।। काव्यशास्त्रविनोदेन.....।।

– साध्वीजीश्रीप्रशमनिधिश्रीः

विश्वसन्ति जनाः कस्माज्-जपान्मन्त्रा भवन्ति किम्?।
साक्षाद् भवन्ति के सत्त्वात्, **सत्यात् सिध्यन्ति देवताः ।।१।।**

कुत्र स्यात् सूक्ष्मजीवाली, कीदृशं दर्शनं व्रतात्?।
बलं कातरनृणां किम्?, **सर्वत्र बलवच्छलम् ।।२।।**

काः सन्ति मङ्गले कार्ये, दाने किं क्रियते जनैः।
साधवः कति जल्पन्ति, **कन्यकाः दीयते सकृत् ।।३।।**

मूर्च्छा केषु जनानां स्यात्?, विश्वे मूर्खा जनाः कति?।
प्रार्थनां कुर्वते केऽत्र?, **रत्नेषु बहवोऽर्थिनः ।।४।।**

किं दुष्कृतेषु कर्त्तव्यं?, कं स्मरेद् विरहे वधूः?।
नेच्छति कं पतिं कन्या?, **धिक् धिक् कान्तमपण्डितम् ।।५।।**

कथ्यते नरकान्तं किं?, कर्तव्यं कुत्र मार्दवम्?।
केषामस्ति वसुन्धरा?, **राज्यं सर्वत्र दोष्मताम् ।।६।।**

स्त्रीणामालम्बनं काः स्युः? कः सेव्यो देववत् स्त्रिया?।
कामचारा भवेयुः काः?, **सत्यः स्वपतिदेवताः ।।७।।**

# ।। तत्वत्रितयपञ्चकम्।।

– साध्वीजीश्रीव्रतरक्षिताश्रीः

(वसन्ततिलका)

तीर्थेशभाषितवचांस्यनुसृत्य तूर्णं,
सङ्घाधिपेन रचिता खिलद्वादशाङ्गी।
तस्याः पदार्थमनिशं हृदि श्रद्दधाति;
**श्रेयस्करं गुरुवरं सततं नमामि।।१।।**

प्रत्येककार्यकरणे बहुमन्यते यो,
वीणारवेणसदृशां मधुरां जिनाज्ञाम्।
श्रद्धां च शुद्धमनसा प्रभवे दधाति;
**श्रेयस्करं गुरुवरं सततं नमामि।।२।।**

निष्पापनिर्मलमनः सुगुरु र्बिभर्ति,
चारित्रपालनपरं वचनं बिभर्ति।
पञ्चप्रमादरहितं करणं बिभर्ति;
**श्रेयस्करं गुरुवरं सततं नमामि।।३।।**

दुष्टाष्टकर्मरिपवे करवालतुल्यं,
लोकाग्रभागगमने वरयानतुल्यम्।
सम्यक्तपः स्तपति यः सततं विमुक्त्यै,
**श्रेयस्करं गुरुवरं सततं नमामि।।४।।**

आवश्यकं सविधिना सकलं करोति,
देवालये जिनवरं समुदं प्रणौति।
भव्यात्मनां प्रवचनं बहुशो ददाति;
**श्रेयस्करं गुरुवरं सततं नमामि।।५।।**

पथिकं **मुक्तिमार्गस्य,**
मां कुरुष्व **सुरक्षितम्।**
संयमार्द्धशताब्द्यां त्वां;
**प्रार्थये भो! व्रतीश्वर!।।६।।**

# जिनाज्ञापालनं परम्

– साध्वीजीश्रीव्रतरक्षिताश्रीः

अष्टादशदोषरहितेन, अष्टमहाप्रातिहार्यपरिचर्यासहितेन, गणभृतां 'उप्पेइ वा' 'विगमे इवा धुवेइवा' इति द्वादशाङ्गी कल्प लतामूलायितत्रिपदीदात्रा सर्वज्ञभगवता स्थापितमिदं श्री जिनशासनम्। तस्मिन् शासने स्वमतिकल्पनया कृताया महत्याः अपि प्रवृत्त्या मूल्यमल्पमपि नास्ति। जिनशासनमिदं आज्ञाप्रधानमस्ति, तेनैव सर्वज्ञाऽऽज्ञा–पूर्वकमाचरितमल्पमप्यनुष्ठानमनल्पमूल्यवद् भवति।

संबोधसप्ततिकाप्रकरणे प्रोक्तं, श्री रत्नशेखरसूरिणा–

''आणाइ तवो आणाइ, संजमो तह य दाणमाणाए।

आणारहिओ धम्मो, पलाल–पुल्लू व पडिहाइ ।।४०।।

सर्वज्ञानामाज्ञायाः पालनं कृत्त्वानेके भव्यात्मान उत्तरोत्तरात्मगुणेषु प्रगतिं भूतकालेऽसाध्नुवन्, वर्त्तमाने साध्नुवन्ति, अनागतकाले साधयिष्यन्ति च।

''बाह्याभ्यन्तरशुद्ध्याः साधकमस्ति आज्ञापालनं, पुण्योपार्जनस्य बेन्के एफ.डी. कारकमस्ति आज्ञापालनं, आत्मानं गुणानुरागिताया यज्ञे योजकमस्ति आज्ञापालनम्।''

तस्योपरि एकं दृष्टान्तं पश्यामः।

आसीदेकः सद्गृहस्थः। स वृद्धावस्थायाः प्रारंभे वर्त्तमानोऽभूत्, तदा स साधुर्जातो लघुकर्मितया। स चिन्तयति–न जानीयां कमपि शास्त्रार्थमहम्, प्रादुरभवत् तस्य हृदि ईदृशी निश्चला भावना, करिष्यामि कर्मनाशं मुनीनां भक्तिद्वारेण इति प्रबलेच्छा तस्य चित्ते प्रकटीभवति स्म, नास्ति कोऽप्यवकाशः सम्भ्रमस्य तस्य चित्तवृत्त्याम्। न प्राप्नोति किञ्चिदपि स्थानं त्वरा तस्य जीवने। तस्य सखायते शान्तिः विकाराभावात्, मित्रायते च स्वस्थता विकल्पाभावात्।

स गच्छति प्रतिदिनं ग्रहीतुं भिक्षाम्। गच्छन् स गृह्णाति द्वे झोलिके। किमर्थम्? एका भोजनमानेतुम्। अपरा पथि पतितानि पत्राणि सञ्चेतुं पिण्डीकरोति तस्यां झोलिकायां पत्राणि। सञ्चित्य आनयति स्म प्रतिश्रयम्। न भवेद् यस्यां भुवि आशातना तत्राक्षिपत् स तानि पत्राणि। आबहुवर्षेभ्य एष क्रमः प्रवर्तते।

रोचते विनयोऽतिशयमस्मै मुनये। प्रीणयति अमुं मुनिं परोपकारिता। स भावयति अहर्निशमेवं भावनां यथा–प्राप्नवं प्रव्रज्यामहं वृद्धवयसि। ततः नालम्भविष्णुरध्ययनं कर्त्तुमहम्। तस्मात् करोमि केवलं वैयावृत्यं साधूनाम्। आचरामि ज्ञान–ज्ञानिनोर्भक्तिम्, तथा सफलीकरोम्यहममुं मनुष्यभवम्।

सर्वदा प्रसन्नतया–ऽन्येषां साधूनां वैयावृत्त्यं विधाय स मुनिरलभत सर्वेषां हृदयेऽपूर्वस्थानम् । अवातरच्च गुरोरपि पूर्णकृपा तस्योपरि, प्रतिजागर्त्ति स मुनिरेकदा गुरुं, आज्ञापितं गुरुणा तदा ! यदुत

'हे स्थविरमुने ! अधीष्व व्याकरणं श्वस्तनदिनात्'। ''तथेति गुरुदेव ! एवं स्वीकृतं कृतकृत्यीभूतेन तेन मुनिना नम्रतया। न तिष्ठन्ति तर्कः, शङ्का, कुविकल्पाश्च आज्ञाया अग्रे। प्राहिणोद् देशाटनार्थं चित्तसमुत्थां भक्तिभावनेच्छां स मुनिः।

प्रारब्धवान् द्वितीयदिवसादेव आज्ञायाः आराधनां स मुनिः। योऽभूद् असमर्थः पठितुं स्पष्टाक्षराण्यपि, स मुनिरग्रेतनोऽभूद् व्याकरणस्य कष्टदायिनां प्रयोगाणामुच्चारकेषु वैयाकरणेषु मध्ये। न कुर्यु र्यदध्ययनं कुशाग्रप्रज्ञावन्तोऽपि, कृतं तदध्ययनचिरादेव मुनिनाऽमुना।

मुनिःस ''वैयाकरणी'' इति प्रसिद्धिं प्राप्तः।

य उपेक्षते ज्ञानाध्ययनम्। करोत्यविनयं ज्ञानज्ञानिनोः। अवजानीते गुरुम्। आचरति विनय-भक्ति वैयावृत्त्येष्वालस्यम्। याति प्रमादस्य वशं। आसेवत ईदृग् – कार्यं यो मनुष्यः । स आह्वयति मूर्खतां मतेः उपस्थित्यामपि।

यः पठति स्वयं साधुजीवने, अध्यापयति चान्यान्। श्वासोऽस्त्य ध्ययनाऽध्यापनमेव यस्य, तस्मिँश्चैव तत्परो निर्वापयति यो जीवनं, जायन्ते तस्य शिथिलानि मोह-माया-ममतानां बन्धनानि।

जैनशासने भूषणायन्ते बहुश्रुतचणा महात्मानः स्वप्रतिभाप्रस्फुन्मणिगणैः।

सर्वेषु गुणेषु श्रेष्ठतममस्ति आज्ञापालनमेव। सर्वेषु कार्येषु प्रथमं कर्त्तव्यं आज्ञापालनमेव। सर्वाण्यनुष्ठानानि निष्फलानि विना आज्ञापालनम्। अनपेक्षिता-ऽपूर्वा-ऽचिन्तिता च सिद्धिर्भवत्याज्ञापालनात्। क्लिष्टकर्माणि नश्यन्त्याज्ञापालनेन। असावादर्श आदरणीयोऽस्ति आज्ञापालनस्य। विनयादिगुणानां प्राप्तिरपि भवति आज्ञापालनादेव।

आत्मनः शुभभावपरिणतिरन्तरङ्गशुद्धिश्च भवत आज्ञापालनेनैव। परमपदस्य पथिकं, पथं सम्यग् दर्शयति आज्ञापालनमेव।

वयमप्याज्ञापालनं सर्वस्वं मत्वा, तस्याराधन आदरवन्तो भवामः। एतच्च आज्ञापालनं मम जीवनस्य साफल्यं करोत्वित्याशासेऽहम्।

## ।। सप्तविभक्त्याः श्रीरामस्तुतिः ।।

– श्री कल्याणगुणाश्रीः

श्री रामः शरणं समस्त जगतां, रामं विना का गतिः।
रामेण प्रतिहन्यते कलिमलं, रामाय तस्मै नमः।।
रामात् त्रस्यति काल-भीम-भुजगो, रामस्य सर्वं वशे।
रामे भक्तिरखण्डि ता भवतु मे, राम ! त्वमेवाश्रयः।।

# ।। कथा ।।

– साध्वीजी श्रीकल्याणगुणाश्रीः

कस्मिँश्चिद् ग्रामे गोपबालः प्रतिदिनं गाश्चारयितुं बहिर्ग्राममनैषीत्। एकस्मिन् दिने चारयता तेन दीप्तिमान् पाषाणो दृष्टः, तं गृहीत्वैक गोः कण्ठे क्षिप्तः। तदैकः श्रेष्ठी आगतः, दृष्टश्च पाषाणः, कथितवान्, भो ! बाल ! यच्छैतम् पाषाणम्, गृहाण पश्च रुप्यकाणि। बालः–न पञ्चभिः, अपि तु दशभिः गृहाण। लोभवशेन श्रेष्ठिना न गृहीतः, गतश्च।

स्तोकवारं पश्चादेको रत्नपरीक्षक आगतः, तेन कथितम्– बाल! देहि पाषाणम्, गृहाण शत–रुप्यकाणि।

गोपबालः प्रसन्नीभूय शतरुप्यकाणि गृहीत्वा, पाषाणं दत्तवान्। गृहञ्च गतवान्।

प्रदोषकाले किञ्चिच्चिन्तयित्वा प्रथमः श्रेष्ठी गोपालगृहे आगतवान्, कथितवाँश्च दशरुप्यकाणि गृहाण पाषाणश्च देहि। बालेन कथितम्–मया शतेभ्यः प्रति पाषाणो दत्तः, तदा श्रेष्ठिना कथितम–रे मूर्ख ! तच्चिन्तामणिरत्नमासीत्, अज्ञेन त्वया ''पाषाणः'' इति मत्वा हारितः सत्यमेव त्वं मूर्खोऽसि।

बालः– रे श्रेष्ठीन् ! ज्ञात्रापि त्वया जानताप्यहार्यत, तर्हि त्वन्तु महामूर्खोऽसि !!!

उपनयः = गोपालबालः = अज्ञ–संसारी जीवः।
पाषाणः = धर्मरत्नम्।
श्रेष्ठी = रत्नज्ञोऽपि संसार–सुखलिप्सुः।
५–१० रुप्यकं = संसार सुखम्।
रत्नपरीक्षकः = रत्नज्ञः मोक्ष–सुखलिप्सुः।

यथा श्रेष्ठिना १० रु. तुल्यया संसार–सुख–लिप्सया रत्नतुल्यो धर्मोः हारितः, तथा वयं न भवेम। अपितु रत्नपरिक्षको यथा शत रु. तुल्यं सर्वसंसारसुखं त्यक्त्वा धर्मरत्नं गृहीत्वा चिरं सुखमन्वभवत्, तथा वयमपि शाश्वतसुखं अनुभवेम।

## नर्म-कटाक्षः

पत्नी पतिं प्रतिः– एको रावणः, दश शिरांसि, विंशतिरक्षीणि, तर्ह्यपि दृष्टिः
एकायां–सीतायाम्...
त्वमेकः तवैकः शिरः, द्वे अक्षिणी, तर्ह्यपि दृष्टिः
प्रतिस्त्रि...

वदतु ! कोऽकृत्रिमो रावणः???

● बोधः – जगति परदुराचारो ऽणुवदपि मेरुवत् प्रतिभासते, स्वोऽनाचारो मेरुतुल्योऽप्य अणुवद् भासते इति महियसी दोषदृष्टिः दूरीकर्त्तव्यैव।

# किमाश्चर्यमतःपरम्

– डॉ. कृष्णनारायणपाण्डेयः

पृथ्वी ग्रहस्य देशेषु, संविधाने समानता।
दृश्यते नैव कुत्रापि, किमाश्चर्यमतः परम् ।।१।।

एकत्वं कथ्यते नित्यमीशांशसृष्टिवर्णने।
व्यवहारे सदा भेदः किमाश्चर्यमतः परम् ।।२।।

व्यक्तिवादप्रचारेण, विश्वबन्धुत्वदर्शनात्।
स्वार्थसिद्धिकृता सर्वैः किमाश्चर्यमतः परम्। ।।३।।

समाजे क्रियते सेवा, गृहे कलहकारिणा।
सम्बधितेषु वैरं चेत्, किमाश्चर्यमतः परम् ।।४।।

आत्मप्रशंसनान्नष्टं, पुण्यं संचितकर्मभिः।
परनिन्दामहापापात्, किमाश्चर्यमतः परम् ।।५।।

मम कार्यं सदा श्रेष्ठं, मूर्खताहठवाचकम्।
मित्रेषु कथ्यते ना ना, किमाश्चर्यमतः परम् ।।६।।

शास्त्रेषु वर्तते दिव्या, स्नेहसागरभावना।
मनुजेनाऽम्बुजानं तु, किमाश्चर्यमतः परम् ।।७।।

वीसा–कस्टम–व्यापारे, मानवता विनाशिता।
स्वातन्त्र्यं नास्ति सर्वत्र, किमाश्चर्यमतः परम् ।।८।।

सिंह–सर्प–सुरक्षार्थं, पर्यावरण–रक्षणम्।
गोहत्या क्रियते विश्वे, किमाश्चर्यमतः परम् ।।९।।

प्रकृतेः पूजनं दिव्यं, भारतीयधर्मे श्रुतम्
धर्मो मानवता नास्ति, किमाश्चर्यमतः परम् ।।१०।।

# 'संस्कृतकवितागौरवम्'

– डॉ. रूपनारायण पाण्डेयः

विद्यन्ते साम्प्रतं सुरभारतीसमुपासनासक्ता बहवो विद्वांसः, तेषु वार्धक्येऽपि सततं साहित्यं संरचयति डॉ. रामकिशोरमिश्रः। 'संस्कृतकवितागौरवम्' इति तस्य नूतनः काव्यसङ्ग्रहः प्रकाशितोऽस्ति।

ग्रन्थेऽस्मिन् पञ्चदशोत्तरशतकविताः सङ्कलिताः सन्ति। तद्यथा–ईश्वरस्य व्यापकता, भगवद्दर्शनं कृतम्, तपस्या मातृसेवया, त्वं कन्याविवाहान् न कुरु, बिडाल्यां कालीदर्शनम्, सेवा सर्वोपरि धर्मः, निद्रोपासना, एभिः किमपि न कृतम्, न्यायवितरणे दोषाः, बलात्कारिणो दण्डोऽयम्, प्रतिभा कलाकाराणाम्, अमूल्यं जलं रक्ष्यताम्, भस्माच्छादितोऽग्निरिव, चार्वाक–बुद्धसमता, आरोग्यमत्र सुखदम्, हरेर्नवमोऽवतारः, त्रिविधा भक्ताः, निर्वाचनम्, नर्मदायां प्रवाहः, साक्षरता, आदरभावना, स्वप्ने स्वविवाहः कृतः, जीवने हास्यप्राधान्यम्, शैलपुत्रीचरितम्, ब्रह्मचारिणीचरितम्, चन्द्रघण्टाचरितम्, कूष्माण्डाचरितम्। स्कन्दमातृचरितम्, कात्यायनीचरितम्, कालरात्रिचरितम्, महागौरीचरितम्, सिद्धिदात्रीचरितम्, त्रिभुवनेश्वरमन्दिरम्, सुकर्णचरितम्, शक्तिमन्तः सन्ति शब्दाः, मातृपितृसेवां कुरु, स्वामिरामतीर्थचरितम्. भाग्यं न कर्मावश्यकम्, काश्यां गङ्गास्नानम्, तदहमस्मि भारतम्, तुलाधारस्य विरक्तिः, श्रीज्ञानेश्वरचरितम्, एकाङ्कमहत्त्वम्, उत्तमक्रियाः, मनुष्यकामना, दस्युरपि भक्तोऽभवत्, श्रीधरचरितम्, स्वलक्ष्येऽहं सफलः स्याम्, दर्शनानन्दचरितम्, भूमिविस्तरे निद्रितः, राष्ट्रधर्म–निर्वाहपरम्परा, पूजा क्रोधेन निष्फला, चरकचरितम्, यत्नेन लभ्यते फलम्, मतं नाहं विक्रेष्यामि, दूरतः पर्वतो रम्यः, कोमलः सरसो भव, ईशस्थाने मुद्राध्यानम्, गुर्ददो जीवनदाता, जिह्वा नो महत्त्वशीला, यथा बीजं तथा फलम्, ब्राह्मणभोजनम्, अभिमानः पतनकारणम्, सत्सङ्गेन जीवनं परिवर्तितम्, ऋषिसन्दीपनशिक्षा, हरिभक्तस्य जातिर्न, मनुष्यस्य विशेषताः, प्राणिषु समदृष्टिर् धार्या, पुनर्जन्म सुगन्धस्य घ्राणं चौर्यम्, वेदव्यासोपदेशः, पारिश्रामिकान्नाधिकम्, श्रीहरेरुपदेशः, कार्मिकदिनाचरणम्, मतदानेन प्रजायाः प्रभुत्वं, रचनात्मकं कार्यं कृतम्, सीतायाश्चूडामणिः, सद्गुणानन्दचरितम्, पञ्चवटी, बलिप्रथा, सीतायाः पालकी, श्वेतकेतुचरितम्, विश्वप्रतिष्ठा धर्मोऽस्ति, बुद्धशिष्ययोः संवादः, क्रोधे नियन्त्रणं कार्यम्, गङ्गा विषमयी जाता, बोधिसत्त्वचरितम्, सहस्रचिन्त्यचरितम्, सनकादिचरितम्, नर–नारायण–प्रह्लादसङ्ग्रामः, सुजातापायसम्, पलाण्डुपुराणम्, दृश्यते ज्ञानिनो नाऽऽयुः, विदुरनीतिवचांसि, शनेर्वक्रगतिः, योगनिद्रा, कैकेयीपादवन्दनम्, वृद्धोऽभवच्चिन्तामग्नः, अक्षैर्मा दीव्य भद्र हे, आत्मतत्त्वज्ञानी भव, आराधनया कल्याणम्, शुद्धं जलं न लभ्यते, महावीरस्य सन्देशः, अपमानप्रतिशोधः, न्यायेन प्रसन्ना प्रजा, नष्टाः संस्कृतस्य ग्रन्थाः, श्रीशिवशङ्कराष्टकम्, वन्दे कृष्णं जगद्गुरुम्, धर्म एव सहायकः, कर्तुमिच्छसि नाम लोके, प्रेमबन्धनम्, कवे ! ईदृशं गीतं श्रावय,

* डॉ. रूपनारायणपाण्डेयः मनीकापूरा, चांदपुर, सोरामः, प्रयाः उ.प्र. – २१२५०२, मो.: ९९३६९३०५७५

अन्यायसहनं पापम्, स्त्रियं हीनां न मन्येत, जनदेवचरितम्।

ग्रन्थान्ते लेखकस्य परिवारस्य च परिचयः शोभते।

नितरां सरलया भाषया विविधविषयान् समाश्रित्य कविवरमिश्रस्य भारती भव्यभावोपेतां कवितां प्रस्तौति। तस्य राष्ट्रप्रीतिः प्रशंसनीयास्ति। 'तदहमस्मि भारतम्' इति कवितायां भारतपुरुषस्य तस्य कल्पनावलोकनीयास्ति।

'अहमत्र भारतोऽस्मि, मस्तको मे हिमालयः ।
एतौ स्तौ मदीयौ हस्तौ, पूर्वापरपयोनिधी ।।
उत्तरदेशो मे वक्षो, मध्यदेशो ममोदरम् ।
महाराष्ट्रप्रदेशो मे, समुद्राख्या कटि र्मम।।
आन्ध्र-तमिलनाडु च, द्वे जङ्घे भवतो मम।
चरणौ मम स्तः कन्या-कुमारीह रामेश्वरम्।।' (सं., ३१३-३१८)

अथ मानवः कर्त्तव्यं विनैव पदं प्रतिष्ठां विपुलां च सम्पदां कामयते।

सन्दर्भेऽस्मिन् कवेः केचन निर्देशाः पठनीया अनुगमनीयाश्च।

'यावत् ते सुखदो नाम, परहानिः सुखप्रदा।
तावत् ते नाऽत्र कल्याणं, हानिश्चैव भविष्यति।।
तव प्रिया परनिन्दा, यावत्ते प्रशंसा प्रिया।
तावत् त्वं निन्दनीयोऽसि, कल्याणं न भविष्यति।।
यावत् ते प्रियः सन्मानः, **परापमानश्च प्रियः।**
तावत् त्वमस्मिँल्लोके ह्यपमानितो भविष्यसि।।
यावत् ते सुखस्य वाञ्छा, कामानाऽन्यदुःखस्य च।
तावत् त्वं सर्वदा दुःखं, प्राप्स्यस्यत्र निरन्तरम्।।
यावत् त्वं प्रदाने दुःखं, जानासि ग्रहणे सुखम्।
तावत् तुभ्यमत्र लोके, कोऽपि वस्तु न दास्यति।। (सं. ३६१-३६४-३६६)

सम्प्रदायनिरपेक्षे कवितासङ्ग्रहेऽस्मिन् समाजोपयोगिषु सर्वेषु विषयेषु कविना स्वविचाराः सम्प्रस्तुताः। यस्मिन् कर्मणि समाजस्य राष्ट्रस्य सकललोकस्य च कल्याणं स्यात्, तेषां प्रशस्तिरत्र नितरामृजुतया प्रस्तूयते। कुत्रापि भावाभिव्यक्तौ नास्ति गूढता, न च शब्दानां प्रयोगे क्लिष्टता दुरुहता वा। ये संस्कृतभाषायाः दुरुहत्वं मन्यन्ते, तेषां कृते कृतिरियं नितरामुपयोगिनी। ते रचनामिमामधीत्य संस्कृतस्य सारल्यमनुभवितुं शक्नुवन्ति। रचनेयं संस्कृतानुरागिभिः सङ्ग्रहणीया पठनीया च। जयति संस्कृतं संस्कृतिश्च।

* * *

**मृत्योः पश्चात् न जननं,
तदेव
परमात्मभवनम्।**

# सत्यभक्त-दोहावली

- मूलकारः स्वामीसत्यभक्तः
- रूपान्तरकार : शान्तप्रकाशः सत्यदासः

१) न स्यात् प्रतिमायाः, स्तुतिर्गुणकीर्त्तनमीशस्य
प्रभोस्तदध्ययनं यथा, अध्ययनं ग्रन्थस्य ।

२) भ्रान्त्या ये तु प्रस्तरम्, ईश्वरमवगच्छन्ति
तेषां स्यात् पूजा वृथा, मूढास्तेऽज्ञाः सन्ति ।

३) भृता वायुना भस्त्रिका, यथाम्बुनिधौ तरति
संसारं जीवास्तथा, भक्तिं चेत् कुर्वन्ति ।

४) पापरता अपि पापिनः पापं नो वाञ्छन्ति
तान् प्रति पापश्चेद् भवेन्नूनं तेऽपि तपन्ति।

५) अस्मान् यदनिष्टं लगेल्लगति तदेव परन्तु
पुण्यपापयोर्लक्षणं, एतत् संक्षिप्तं जानन्तु ।

६) सुखमपि स्याच्चेत् पापतः, तत् प्राप्यत एकेन
दहन्ति नैके प्राणिनः, किन्तु पापतापेन ।

७) अमितोऽनर्थस्तत्र भो ! मितोऽपि नार्थो यत्र
अर्थं विना तु जीवनं, व्यर्थमेव सर्वत्र ।

८) अतिभोग-व्यभिचारयोर्नावसथः कामस्य
कामो यत्र हि संयतो ना वसथः पापस्थः।

---

● अच्छान्दसीयं रचना, - 'संशो'

९) [१] न स्यात् का कामे पापिता, सा त्वतिभुक्तावेव
कामहीनता प्राणिनो व्यनक्ति जड़तामेव ।

१०) कामः स्यात् सर्वं सुखं यत् 'परतः' प्राप्नुयात्
परसंयोगे नात्मनो हृत्-तन्त्री कम्पेत ।

११) स्याद् रक्षा चेतसि न चेद् वृथा तनौ रक्षाऽपि
मनसि सम्पदा कोटिशः स्यान्न तनावेकाऽपि ।

१२) पुष्टे देहे यो वनम्, आटद् गृहं विहाय
स एव कामरतोऽभवत्, सुतनुं मनसि विधाय ।

१३) यस्य मानसे संयमः, योगस्तस्य गृहेऽपि।
यस्य मानसेऽसंयमः, भोगस्तस्य वनेऽपि ।

१४) यावन्ति कार्याणि सर्वाणि भवन्ति सुखलाभाय
यैस्तु सुखाऽऽप्ति र्नो भवेत् तानि स्यु र्वृथा श्रमाय ।

१५) धन-विद्या-रमणीयता-शक्यधिकार-यशांसि
अन्विष्यन्ते सुखकृते, भूमि-समुद्र-नभांसि ।

येन कोऽपि गुणी भवति, स नाम मानवः।

१) नैतदभिमतमस्माकम्

# भगवद्दर्शनं कृतम्।।

– डॉ. आचार्यरामकिशोरमिश्राः

१) व्याधकर्म त्यक्त्वा व्याधो, देविकासरितस्तटे।
स तपस्यां करोति स्म, दुर्वासा तत्पार्श्वं गतः

२) पीडितः क्षुत्पिपासायामस्म्यहं शृणु तापस !
सोऽखादयत्क्रोधिनं तं कन्दमूलफलानि च

३) भोजनेन सन्तुष्टेन तेन तस्मै ददे वरः।
सत्यतपा ऋषिनाम्ना त्वमत्र ख्यातिं प्राप्स्यसि

४) बहुकालात्पश्चात्तत्र वराह एक आगतः।
पश्चादेको धनुर्धारी तस्याखेटकमागतम्

५) ऋषे ! मां वद सोऽपृच्छत् किं सूकरो दृष्टस्त्वया ?
स दृष्टोऽस्ति मे नेत्राभ्यां किन्तु ते वक्तुमक्षमे

६) वक्तुं शक्नोति तं जिह्वा परं स न दृष्टस्तया ?
पश्चात्तेनर्षिणा दृष्टः साक्षाद्विष्णुरुपस्थितः

७) 'सत्यासत्यरहस्यं त्वं जानासि' विष्णुरब्रवीत्।
व्याधर्षिणा सत्यमुक्त्वा भगवद्दर्शनं कृतम्

८) गरुडे तमुपवेश्य विष्णुः स्वर्गलोकः गतः।
रामकिशोरमिश्रेण प्रोक्तविषयो वर्णितः

९) ब्रह्मा त्वमसि विष्णुस्त्वं महादेवोऽसि शङ्करः।
इति व्यापकतेशस्य त्वमीशः सर्वव्यापकः

१०) भारत उत्तर प्रदेश एडाजनपद–सोरोंवासी,
होतीलाल–कलावत्योः सुतः शूकरक्षेत्रवासवान्।
विद्यावाचस्पति[१]–पदधारी रामकिशोरमिश्र इह,
काव्यकथोपन्यासरचयिता भगवदर्शनं कृतवान्

• नानुमतमयं विषयः, अच्छान्दसकृतिरियम्

# ज्वालयतु रे दीपपङ्क्तिम्

– डॉ. प्रशस्यमित्र शास्त्री, रायबरेली
(साहित्य–अकादमी एवं राष्ट्रपति सम्मानप्राप्तः)

दीपकेनैकेन कृपया ज्वालयतु रे दीपपङ्क्तिम्।
राष्ट्ररक्षार्थं हि सततं सैनिकाः नः विगतनिद्राः,
सज्जिताः सीम–प्रदेशे सर्वदा सन्नद्धमुद्राः।
देश–प्रेमरतस्तदर्थं वाचयस्व सदा प्रशस्तिम्।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।१।।

मूढता दीनता जडता प्रतिदिनं वर्धते देशे,
ज्ञानहीनजनास्तु धूर्ताः, निःसृताः यदि साधुवेशे।
ज्ञानज्योतिष उद्गमार्थं नाशयतु रे तिमिरशक्तिम्।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।२।।

राजनीतिरियं सखे ! ननु वर्त्तते गणिकेव चेष्टा,
नैव विश्वासः सतामिह धारणेयं हृदि निविष्टा।
कण्टकाकीर्णेषु पथिषु प्रकटयसि किं स्वाऽनुरक्तिम् ?।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।३।।

शोषिताश्च बुभुक्षिताश्च वस्त्रहीना जना अनेके,
पर्यटन्ति विभिन्नमार्गे चेतनावन्तः स्वदेशे।
जडताभृतः परं त्वं दर्शयसि किं वृथा भक्तिम् ?।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।४।।

भ्रष्टमाचरणं जनेषु वर्धते, ननु महारोगः,
जातिवर्ग–विशेषवादः वर्त्तते ननु महाशोकः।
रोग–शोकनिवारणार्थं चिन्वतु काञ्चिदपि युक्तिम्।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।५।।

लोकतन्त्रमिदं विचित्रं चिन्तयति नहि तान् दरिद्रान्,
राजनेतारस्तु सततं, साधयन्ति सदा समृद्धान्।
सत्यनिष्ठाविरहितेभ्यो दापयिष्यति को विमुक्तिम्?।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।६।।

मातरं पितरं गुरुं वा सेवते बहुश्रद्धया कः?
संस्कृतं वेदोपनिषदं पठति कः श्रद्धाऽभिभूतः?।
योजयामि तदुत्तरेऽहं नाम्नि ते प्रथमा-विभक्तिम्।।
ज्वालयतु रे ! दीपपङ्क्तिम्।।७।।

संसारो नाम विषयकषायित्वम्,
तस्मिनासक्तस्य संसारित्वम्,
यावदंशं दुःखेभ्यः भीतिस्तावदंशे संसाररसिकता ।।

# अमरफलम्

लेखक – डॉ. रामकिशोर मिश्रः

(१)

पिङ्गले ! क्वाऽस्ति तदमरफलम्? यन्मया ह्यस्तुभ्यं दत्तमासीत्। एतद्भर्तृहरिवचनमाकर्ण्य– 'तन्मया ह्य एव भक्षितं राजन् !' इति पिङ्गला तदुक्तं प्रत्युत्तरितवती। 'यदि त्वया ह्यस्तद्भुक्तम्, तर्हि तदमरफलमद्य मे पार्श्वे कथमागतं राज्ञि!' नाऽहं जाने राजन् ! तस्याऽमरफलस्याऽऽगमनरहस्यम्।' इत्थं राज्ञीकथनं श्रुत्वा

'सत्यं ब्रूहि, मया त्वयि विश्वासः कृतः, परं त्वया तदमरफलं कस्मैचिदन्यस्मै जनाय भक्षणाय दत्त्वा मम विश्वासघातः कृतः' इत्युक्त्वा राज्ञा तस्यां वेत्राऽऽघातः कृतः।

पिङ्गला – मा मारय मां राजन् ! मा मारय माम्।

भर्तृहरिः – अहं वेत्राघातैस्तव प्राणान् हरिष्ये, यदि त्वं सत्यं न वदसि।

भर्तृहरिः – सत्यं वद, तदमरफलं त्वया कस्मैचिद् दत्तम्?। यन्मे पार्श्वं प्रत्यागतमद्य।
त्वामहं वेत्रैर्हन्मि।

पिङ्गला – राजन् ! मां वेत्राघातैर्न जहि, सत्यमेव वच्मि त्वाम्। अहममरफलं भक्षयितुमुद्यताऽऽसम्, परं तदन्तर्गतं कीटमवलोक्य नाऽभक्षयम्। अतस्तदमरफलमश्वपालाय दत्तम्।

भर्तृहरिः – त्वया तदमरफलं तस्मै कथं दत्तं? सत्यं कथय।

पिङ्गला – मया तस्मै भक्षणाय तदमरफलं दत्तं राजन्। वेत्राघातैर्न मां मारय।

भर्तृहरिः– पिङ्गले ! तदमरफलमासीत्। यो जनस्तद् भक्षयिष्यति, स त्वमरो भविष्यतीति साधुनोक्तम्।

तदमरफलं भक्षयित्वांऽहममरो भवेयमिति साधोरिच्छाऽऽसीत्, परमहं त्वामत्यन्तमिच्छामीति तदमरफलं स्वयं न भक्षयित्वा तुभ्यमददाम्। ममेच्छाऽऽसीद् यद् तदमरफलं भक्षयित्वा त्वममरा स्याः।

परं त्वमपि तन्न भक्षयित्वा स्वाऽभीष्टजनायाऽश्वपालाय तदददाः। त्वं मदपेक्षया तस्याऽमरत्वमिच्छसीतित्वामहं हनिष्यामि। (वेत्रैस्तां ताडयति)।

पिङ्गला – क्षमस्व मां राजन् ! मां न जहि। (रोदिति)।

२९५/१४ पट्टीरामपुरम्, खेकड़ा (बागपत) उ.प्र. २५०१०१ दूरभाषाङ्कः– ०१२१२२३३५२७

राज्ञा सोऽश्वपाल आहूतः। स उक्तो यद् राज्ञीदत्तममरफलं क्वाऽस्ति? तेन कथितं तदमरफलमिष्टगणिकायै दत्तम्। राज्ञीदत्तममरफलं त्वया कथन्न भक्षितमिति निशम्य ''राज्ञी-ममाऽमरत्वमिच्छति स्म, परं मया स्वगणिकाया अमरत्वमिच्छितमिति'' अश्वपालो राजानं न्यवेदयत्।

(२)

भर्तृहरिरुज्जयिन्या नगर्या राजाऽऽसीत्। एकः साधुरेकस्मिन् दिने तस्य राजसभायामागतः। स एकममरफलं तस्मै भक्षणार्थं ददौ, जगाद चाऽमरफलं यदि कोपि भक्षयति सोऽमरः स्यादित्याकर्ण्य राजा भवनं गत्वा स्नात्वा भजनं च कृत्वाऽमरफलं भक्षयिष्यामीति कथयित्वा साधुं विससर्ज। राजसभां समाप्य स राजभवनं गत्वा राज्ञीं जगाद-पिङ्गले ! गृहाणाऽमरफलम्। एतद्भक्षयित्वा त्वममरा स्या इत्यहमिच्छामि। राजन् ! प्रथमं त्वां भोजनं कारयित्वा, शयनकक्षे च स्वापयित्वा भवद्दत्तममरफलं भक्षयिष्यामिति निगद्य तत्कार्यसंलग्ना बभूव।

रात्रौ राजनि सुप्ते निशीथे च राज्ञी स्वप्रियमश्वपालं निकषा तदमरफलं गृहीत्वा जगाम। प्रियवर! त्वमेतदमरफलं भक्षयित्वा त्वमरः स्या इति कामनया मया त्वदर्थममरफलमानीतमिति राज्ञीवचो निशम्य तदमरफलं मञ्जूषायां स्थापयित्वा मम पार्श्वमेहि प्रिये ! निशा व्यतिक्रामति, कथं विलम्बः क्रियते? इति स्वप्रियवचनं श्रुत्वा तत्पार्श्वं च गत्वा गाढमालिङ्गनसुखमनुभूय सुरतिं कृत्वा राज्ञी निशीथाऽनन्तरं राजभवनमाययौ।

तदनन्तरमश्वपालस्तदमरफलं गृहीत्वा स्वप्रेमिकां गणिकामुपजगाम, जगाद च प्रिये ! गृहाण त्वममरफलम्। एतत्प्रथमं भक्षयित्वा त्वममरा भव। ततः सुरतिक्रियां करिष्ये। 'नहि, नहि प्रियतम ! मम पार्श्वमेहि, प्रथमं गाढमालिङ्ग मां, सुरतिं च कुरु। ततोऽहममरफलं भक्षयिष्यामि।' अश्वपालस्तस्यै तत्फलं दत्वा प्रणयं च कृत्वा स्वस्थानमाजगाम।

द्वितीये दिने सा गणिका मध्याह्ने राजसभां जगाम। 'राजन् ! एतदमरफलं मया त्वदर्थमानीतम्। 'प्रथममेतद् भक्षयित्वा त्वममरः स्या' इत्यहं कामये। इत्थं श्रुत्वा गणिकायाः, हस्तादमरफलं गृहीत्वा- 'भद्रे ! त्वं गच्छ? राजसभायाः कार्यं समाप्य राजभवनं गत्वाऽहममरफलं भक्षष्यिामीति तां निगद्य राजसभायामुपविष्टो राजा भर्तृहरिः साधुना दत्तं तदमरफलं पर्यचिनोत्। ततो राजसभाविसर्जनं कृत्वा स राजभवनं ययौ।

(३)

राजभवनं गत्वा राजा भर्तृहरिः स्वराज्ञीमुवाच-पिङ्गले! ह्यस्त्वया तदमरफलं न भक्षितम्। एतदमरफलं तदेव, यन्मया तुभ्यं दत्तम्, पश्य, पश्य। मया त्वयि विश्वासः कृतः, परं त्वया विश्वासघातः कृतः। तदमरफलं त्वया कस्मैचिज्जनाय दत्तं, सत्यं ब्रूहि। एतत्कथयित्वा राज्ञा तस्यां वेत्राघातः कृतः।

तदनन्तरं मारय मां न राजन् ! सत्यं वदामि। इत्थं कथयन्त्या राज्ञ्यास्तत्फलगमनवृत्तान्तं श्रुत्वा

राज्ञीं विश्वासघातिनीं मत्वा राज्ञा हिंसककुक्कुरदन्ताघातैर्मृत्युदण्डो घोषितः। ततो गर्तं खानयित्वा शिरोवर्जितं राज्ञीशरीरं तस्मिन् गर्ते निक्षिप्य मृत्तिकया च गर्तं प्रपूर्य तस्याः शिरसि हिंसकसारमेया दन्ताघाताय मोचिताः। राज्ञा विश्वासघातिन्यै राज्ञ्यै मृत्युर्दत्तः।

राज्ञो राज्ञ्यां बहु प्रेमाऽऽसीत्। स तां सर्वं मन्यते स्म। परं राज्ञी कृत विश्वासघातान त् तेन राज्यै मृत्युर्दत्तः। राज्ञीमृत्योः पश्चात्तस्य मनो विषण्णमभवत्। सांसारिकप्रपञ्चात्स विरक्तो बभूव। तेन स्वाऽनुजो विक्रमादित्य उज्जयिन्या राजा घोषितः। तस्मै राज्यं समर्प्य स भर्तृहरिस्तप्तुं वनं जगाम। तेन शारीरिकं प्रेम धिक्कृतम्। राज्ञीसम्बन्धिनीं घटनां गृहीत्वा भर्तृहरिणा लिखितम् –

यां चिन्तयामि सततं मयि सा विरक्ता,
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परिशुष्यति काचिदन्या,
धिक् तां च तं च मदनं गणिकां च मां च ।।

यो मात्र कुटुम्बेन सह भोजनं कुर्वन् सन्तोषं नानुभवति।
किन्तु अन्यजनैः सह आसयित्वा भुञ्जान आनन्दं प्राप्नोति स जनो महाजनः।।

# ।। सूक्तिमाला ।।

प्रेषकः - पंन्यासश्रीसम्यग्दर्शनविजयो गणी

## मननं यत्र मौक्तिकायते

१) आमृत्यु यत् सततं पीडयेत्, यच्च हृदयं दंशयेत्, तस्य नाम हि पापम्।

- पू.आ. श्रीमद्विविजयपूर्णचन्द्रसूरीश्वरजी म.सा.

## प्रवचनप्रदीपस्य पुण्यप्रकाशः

२) तत्त्वचिंतनं विना कस्यचित् कदाऽपि वैराग्यं नोत्पद्यते।

- पू.आ.श्रीमद्विविजयपुण्यपालसूरीश्वरजी म.सा.

## नवपदोपासके श्रीपाल-मयणा

३) तीर्थ-पर्वयोः भेदोऽस्ति। तीर्थेऽस्माभिः गन्तव्यम्, किन्तु पर्व सन्मुखमागच्छति। तीर्थे यदा गन्तुमिच्छा भवेत् तदा गम्यताम्, बलात्कारेण कोऽपि न नयति। पर्व तु युष्माकमिच्छा स्याद् वा न वा, योग्यसमये आगच्छत्येव। यः तत्पर्व पूजयति तस्यात्मकल्याणं भवत्येव, यो न पूजयति तस्य समागतोऽपि समयो निष्फलो याति। प्राप्तं समयं यो वृथा गमयति, तस्य पुनः तादृक्समयो झटिति न प्राप्यते।

- पू.आ.श्रीमद्विविजय कीर्तियशसूरीश्वरजी म.सा.

## क्रोध-पुरुषः

४) क्रोधस्य प्रथमपादः वैरम्। वैरं मनसि प्रत्याघातजातविचाराज्जायते, वाण्याः च प्रादुर्भवति। वैरं व्यवहारे वर्तने चाविर्भवति। वैरं पिता-पितामहादितः प्रारभ्य पुत्र-पौत्र-प्रपौत्रादि-परंपरामपि वैरविषाऽऽवेशाऽऽक्रान्तां विधन्ते।

- पू.आ.श्रीमद्विविजय जयदर्शनसूरीश्वरजी म.सा.

## जैन सङ्घव्यवस्था

५) यदि गुणवान् गुणज्ञो जनो धनवान् भवेत्, तर्हि निश्चितं प्रभूतो लाभो भवति। किन्तु गुणहीनोऽपि यदि धनवान् भवेत्, तर्हि अल्पोऽपि लाभस्यांशो न भवेत्।

- पू.आ. श्रीमद्विजय रत्नसेनसूरीश्वरजी म.सा.

## सत्-सौख्यान्वेषणम्

६) जगज्जीवमात्रः सुखी भवितुमिच्छति। स्पृहा तीव्राभिलाषा सुखाय च एव वर्तते। जीवमात्रस्य चामुमीच्छां भगवान् पूर्णां करोति। तस्य कृपया तथा करुणादृष्ट्या अनन्ता जीवाः सुखिनोऽभवन्, भवन्ति, भविष्यन्ति च, अत एव तस्य भगवतः कृपायाः मूल्यं अतुल्यतरं वर्तते।

- पू.आ. श्रीमद्विजय योगतिलकसूरीश्वरजी म.सा.

विभाग : २

# अर्वाचीनकृतयः

## खण्ड : ५ मधुरं मधुरं मधुराधिपतेः सर्वं मधुरम्

### चैतन्यप्रवाहः



॥ विभावदशाया वैलक्षण्यम्॥
– श्रेयःसरित्

### जैनं जयति शासनम्...



॥ सुकृतानुमोदनम्॥
– श्रेयोदर्शी

### नवं नवं सौन्दर्यम्.....



॥ सुवर्णस्य परीक्षाः॥
– श्रेयोदर्शी

### परमपदपन्थाः...



॥ मृत्योर्द्वाराणि चत्वारि॥
– श्रेयःपथिकः

### मधुरम्... मधुरम्...



॥ चिन्तनम् ॥
– श्रेयःपथिकः

### आत्मैश्वर्यप्राप्त्युपायः



॥ मदप्रबन्धः॥
– श्रेयस्करः

### स्वादु-स्वादु शुद्धं-शुद्धम् सुखावहं-शुभावहम्॥



॥ आर्जवम् ॥
– श्रेयःश्रीः

### रहस्याऽऽस्वादः



॥ स्त्रीणां चतुर्नवतिस्वरुपविशेषताः॥
– श्रेयःसखा

### ॥ काव्यकौतुकम् ॥



पू.आ.श्री प्रेमसूरिगुरु गुणस्तवनम्
– श्रेयःसद्मा

### वैविध्यम्.....



॥ पुनर्भवनिश्चयः॥ ॥ नवामृतकुम्भाः॥
– श्रेयःसेतुः

### साम्प्रतम्....



॥ ज्ञानमात्मनः महत्तमो गुणः॥
– श्रेयःसद्मा

### वादः न वितण्डावादः



॥ सन्मेधा-प्रागट्यम्॥
– श्रेयःकान्तः

# चैतन्यप्रवाहः

## ।। विभावदशाया वैलक्षण्यम्।।

– श्रेयःसरित्

भानो ! अस्माभिः पूर्वं विभावदशाया वर्णनं कृतमासीत्। विभावदशा हि आत्मनश्चैतन्यप्रवाहं स्वभावं च नष्टं करोति। जीवं जडतुल्यं वितनोति। जीवः स्वं न पश्यति। तया जनः कार्याकार्यविवेकविकलो भवति।

विभावदशा आत्मगुणविरुद्धाऽस्ति। जीवं स्वस्वभावाद् दूरीकरोति वैकल्यभावमासादयति च। ततो विभावदशा प्रयत्नतो दृष्टव्या।

भानुः पृच्छति स्वामिन्! सा का! किं स्वरुपा वा? कतिपया च?

अथाऽऽह – गृहस्वामी! सा बहु स्वरूपा च। अद्य त्वत्पुरतश्चतस्र एव वर्णयामि अन्या तु पश्चात्।

सा विभावदशा विगतः स्वभावः यस्मात् स विभावः। तस्य अवस्था प्रवृत्तिः, आचारः, स हि दशा विभावदशा। अथवा विरुपो भावो यस्मिन् स इति विभावः। अथवा न विशुद्धभावः यत्र स विभावः। अथवा विनष्ट भावः यत्र सः विभावः। इत्येवं स्वरुपा विभावा बहवः सन्ति। तत्र चत्वारः कषायाः वर्ण्यन्ते। तत्राद्यः क्रोधः, द्वितीयो मानः, तृतीया माया, चतुर्थो लोभश्चेति। चत्वार एते कषाया इति नाम्ना गीयन्ते। तेषां नाम सार्थकता यथा कष् = संसारः तस्य आयः = लाभः येन स कषायः।

तत्राद्यः क्रोधो वह्न्युपमानः आत्मनः स्वगुणान् ज्वालयति। स स्वापेक्षाभावतो वर्धते। यदापेक्षापूर्ति र्भवति तदा क्रोधो न भवति। यदि स्वापेक्षा–पूर्ति र्न भवति तदा आत्मानं अश्वकृत्वाऽऽश्ववारायते। तस्याभ्यन्तरस्वरुपमपि निभालयितुं योग्यम्। यदि भानो! तत् स्वरुपमपि न ज्ञायते, तदा तं निष्काषयितुं भावना कथं भवति। स्वामिन् ! किं तदभ्यन्तरस्वरुपं ? अथ गृहस्वामी कथयति–भानो! – क्रोधो अतीव भयावहः तं त्यक्तुं सर्वेप्यात्मानो न प्रभवन्ति यस्त्यजति स धन्यः। ज्ञानिभिः स वैश्वानरनाम्ना दृष्टः। अग्निसदृशः स प्रथमं स्वं दहते पश्चाद् यदि न केनाऽपि निर्वाप्यते तदा स अन्यानपि दहति। ततोऽयं स्व–परदाहकरो भवत्येव। क्रोधाधीनो नरः कुमार्गं प्रवर्तते। न केनाऽपि निर्वर्त्यते। अकरणीयं करोति, अश्राव्यं श्रुणोति, अदर्शनीयं पश्यति। न स्मरति गुरुपदेशं, न गणयति कुलकलङ्कं, न बिभेति पापप्रवृत्तिभ्यो, न जननीजनकखेदं विचारयति। न लक्षयति परमार्थं न जानाति स्वात्महितं, निरन्तरं कलहं करोति, सर्वत्रानादरमाचरति। कार्यं स्वेच्छाविरुद्धं–कार्यं यः करोति तं ताडयति। उच्छृङ्खलतामापादयति। तस्य प्रभावेण सर्वेदोषाः समागच्छन्ति।

पृच्छति चात्र भानुः– ननु किं स्वरूपा दोषास्तस्मिन् क्रोधान्धजने समागच्छन्ति। गृहस्वामी अत्राऽऽह वैश्वानरप्रभावेण सज्जनो यां स्थितिं स्वात्मनि निर्मिमीते तां निदर्शयति। तस्मिन्जने सदैव अहंकारः, अहितकारिता, अकौशल्यं, अवत्सलता च भवति। अविवेकेन विषसदृग् वचनं, हतप्रायो विनयभावः, वर्धमानाऽविवेकिता, नष्टा नम्रता। स्वस्यैव प्राधान्यख्यापनम्। इत्यादि प्रबलतरदोषसमुद्भवो भवति।

अत एव क्षान्तिस्तस्यजीवनेन समायाति। सहिष्णुताया अंशोऽपि पलायते। शान्तिश्च नानुभूयते तेन। क्षान्त्यादीनां को लाभो भवति इति न विमृशति।



या शान्तिः सत्कुलशोभाकरी, कल्याणपद्धतिकरी धैर्य-गांभीर्य-वीर्यैश्वर्यादिगुणशतसंयोजिका, सकलगुणगणसंपादिका च सा राजते। सैव दानधर्मे यशस्करी, सैव ''ज्ञानस्य फलं विरतिः '' जनयति, सैव यम-दम-नियमैर्जीवनं भूषयति। सैव निर्गुणिं महागुणी करोति। सैव वीरपुरषस्य भूषणतामादयति। तथैव मार्दवः प्रकटीभवति। तथैवेन्द्रियनिग्रहो भवति, तयैव विषयवासनाऽल्पी भवति। तयैव जीवमैत्री भवति। तयैव ब्रहमज्ञानं भवति, तयैव स्वात्मसौन्दर्य लभते जीवः। तथैव चित्तप्रसत्तिं लभते नरः। तयैव दुःखं निराकरोति। तयैव ममतां त्यजति। तयैव समतां भवति। तयैव चित्तस्वास्थ्यं प्राप्नोति। तयैव दोषप्रतिक्रिया भवति। तयैवात्मसद्गुण प्राप्त्यैनिदानस्वरुपलाभं स्थैर्यसंपादनं च भवति। तयैव मनसि निश्चलता भवति। तयैव सर्वकार्येषु सिद्धिः भवति। तयैवात्मासौख्यप्रसादयति। ततः क्षान्तिरेव लक्ष्मी। सैव मुक्तिः, सैव सिद्धिः, सैव ज्ञानं, सैव शीलं, सैव बह्म, सैव पूज्या, सैव जगज्येष्ठा, किं बहुना सैव सर्वगुणकंदा, सर्वसंपत्करा, तथापि जीवः क्षान्तिं नाराधयति किन्तु क्रोधादिकषायन् एव सेवते। तेषामेव प्राधान्यं करोति। वैश्वानररुपेण स सर्वेषामधः पतनं करोति। ततः क्रोधः प्रथमो विभावदशात्मकेषु कषायेषु स केनाऽपि प्रयासेन बेतव्य एव।

अथ भानुः पृच्छति स्वामिन्। इदृग् स्वरुपा क्षान्तिः यदि तथाऽपि कथं जनस्तां न भजति? कथं तु क्रोधमेवाऽऽश्रयति। गृहस्वामि वदति सुष्ठु प्रश्नः भवतः, तत्र कारणं नान्यद् अज्ञानमात्रमेव।

तत्प्रभावेण जीवः बहिर्लाभमेव तर्कयति न त्वभ्यंन्तरलाभम्।

ततो विवेकपरित्यागो भवति। बुद्धिमानपि निर्बुद्धिर्भवति। समता दूरीभवति। न धर्मं, न देवं न गुरुं, न पूज्यं मानयन्ति। अहमेव सर्वतोपरीति भावं प्रदर्शयति। उपकारिगणस्यावगणना भवति।

इत्येवं भानो ! क्रोधनामा प्रथमो विभावो। कषायनाम्ना[१] इति ज्ञात्वा तस्य विजये प्रयत्नवद्भिर्भाव्यम्।

तदुत्पतिरनुकुलतायाः रागेण भवति रागश्च अपेक्षा अपरपर्यायः, ततोऽपेक्षा कदाऽपि न कर्तव्या। यदि अपेक्षाविजयो भवेत् तदा क्रोधनिग्रहः संभवति। यत्र नापेक्षानिग्रहः तत्र न क्रोधनिग्रहः। ततोऽपेक्षा तस्य मूलमिति ज्ञात्वा तस्य विजयेऽपेक्षाविजयोऽभिमतः शास्त्रकारैः। भानो ! क्रोधोऽयं चतुष्क्रषायमध्ये प्रथमः प्रथितः। द्वितीयो मानस्तु यथावसरे कथयिष्यामि।

**।। इति शम् ।।**

---

१) भयावहो, भवभ्रान्तिकरः

# जैनं जयति शासनम्.....

## ॥ सुकृतानुमोदनम्॥

– श्रेयोदर्शी

● आङ्गलसाम्राज्यावसरे दिल्लीनगरत उत्तरदिशि सपादशत क्रोशं दूरं सरहानपुरं ग्राममासीत्। तत्र तु समृद्धः श्राद्धः ''लाला जंबुप्रसादजी'' इति नाम्ना लघुभूखण्डपतिः वसति।

स श्राद्धः जीवदयाधर आसीत्। अन्यदा आङ्गलाधिकारिणा प्रोक्तं यत् तव हस्तिं मां देहि, आखेटकार्थं। तच्छ्रुत्वा जंबुप्रसादेन जीवदयाप्रेम्णा प्रोक्तं। यदि भवतां नगरे विहरणेच्छा भवेत् तदा भूषितं हस्तिं यच्छामि किन्तु आखेटकार्थं न। तच्छ्रुत्वा सकोपः स अधिकारी तद्गृहे समागतः, वदति च, किं मां न जानाति? ददातु हस्तीति। तदा निर्भीकः सत्त्वधरः लघुभूखण्डपतिं प्रत्यवदन्।

अहं जानामि सामर्थ्यं भवतां, मां किं करिष्यन्ति, कदाचित् कारागृहे स्थापयिष्यन्ति मम संपत्तिं स्वहस्तगतं करिष्यन्ति। मम वा प्राणं ग्रहिष्यन्ति किन्तु आखेटकार्थं हस्ती नैव दास्यामि।

ससत्त्वं तद्वचनं श्रुत्वा समौनं गतः स नियोगी।

● दक्षिणभारते कारंजनगरे वधैरवालवंशे भोजनामकः श्रावको दृढसम्यक्त्वधारी आसीत्। स प्रतिदिनं जिनालये मौक्तिकानां स्वस्तिकं पूरयति। तस्य गुरुभक्तिः साधर्मिकभक्तिरप्यद्वितीया आसीत्। स ज्ञानमपि प्रतिदिनं पूजयति। तेन वैक्रमीय १७०७ तमे वर्षे श्री गिरनाथतीर्थे लक्षरुप्यकै र्जिनपूजा कारिता। तेनैव शीतकाले दुग्धस्य प्रपा, ग्रीष्मसमये ईक्षुरसस्य प्रपा, सर्वर्तुर्षु एलालवङ्गसंमिश्रजलप्रपाऽपि कारिताऽसीत्। धन्याभक्तिः पुण्याभक्ति....।

● पञ्चशतवर्षादर्वाक् घटनेयं घटिता। आनन्दपूरेण सार्धं पर्वतीयभूपानां युद्धं सञ्जातं। तदा प्रभूता भटाः प्रहारजर्जरिताः सञ्जाताः। तदा कनैया नामा पुरुषः सर्वेषां जलं प्रयच्छति पिपासां च हरति। स शत्रुभटानामपि जलं प्रयच्छतीति वार्ता तद् गुरुशीखसंप्रदायी तेगबहादुरस्य समीपं गता। तदा धर्मगुरुणा स आकारितो पृष्टश्च भो! कथं त्वं शत्रुभटान् जलं प्रयच्छसि। तेनोक्तम् गुरो ! मम सर्वेषु जीवेषु प्रभुदर्शनं भवति। सर्वे जनाः समानाः भवन्ति अत्र को मित्र ! को शत्रुः ? एतच्छ्रुत्वा गुरुः विस्मितः।

धन्य भावना.....। भव्य भावना.....।

● पेलेस्टाइनदेशे एकः श्राद्धपुत्रोऽवसत्। सः पितृभक्तः। स्वर्णहीरकमौक्तिकानां क्रय-विक्रयकरः ''डामा'' इति नाम्ना प्रसिद्धः। अन्यदा तस्य हाटे कश्चित् बहुलाभकरः श्रीमन्तः ग्राहकः समागतः। तेन क्रेतुं निश्चितानि रत्नानि अंतर्गृहमासीत्। तानि लातुं डामाऽन्तर्गतः। किन्तु तद्ग्रहणे पितुः निद्रायाः स्खलना संभाविनी दृष्ट्वा स बहिरागतः। तेन तस्मै कथितं यत् साम्प्रतं युष्माकं रत्नानि दातुं न शक्नोमि, यतो मम जनको निद्राति तस्याःनिद्रायाः स्खलनां नैव कर्तुं शक्नोमि, स क्रेता त्वरमाण आसीत् किन्तु तेन पितृभक्तेन सुपुत्रेण बहुलाभमुपेक्ष्याऽपि पितृनिद्रा प्रधानीकृता –

धन्य पितृभक्तिः....धन्य आर्यदेशसंस्कारः....

॥ इति शम् ॥

# नवं नवं सौन्दर्यम्.....

## ॥ सुवर्णस्य परीक्षाः॥

– श्रेयोदर्शी

कदाऽपि कस्मिँश्चिदपि कार्ये परिक्षायोग्यस्यैव न त्वयोग्यस्य? सर्वाधिकारेषु योग्यता प्रथममपेक्ष्यते। यदि योग्यतां विना यस्मै कस्मैचित् स्थानं मानं वा दीयते तदा हानिः संभवति।

एको राजकुमारः संसारोद्विग्नः, आत्मसाक्षात्कारेच्छुः कस्यचिन्महात्मनः समीपं गतः। सनमस्कारं वन्दनं पूजनं कृत्वा तेन स्वाभिप्रायो दर्शितः। महात्मना कथितं, गृहाण मन्त्रमयं वर्षपर्यन्तं गणयित्वा मम समीपमागन्तव्यम्। इति प्रथमं मन्त्रदीक्षां प्रदत्ता तस्मै तेन। स गतः। तथैव कृतं तेन। एक संवत्सराऽनन्तरं पुनः समागतः स।

यदा स समागतवान् तदा तेन महात्मना पूर्वनिर्दिष्टयैकया स्त्रिया तत्राऽगच्छन्तं तं प्रति संमार्जिन्या कचवरः क्षिप्तः। तेन क्रुद्धो राजकुमारः। प्रधावितस्तां हन्तुम्। तदा महात्मनोक्तम् भो! कुमार त्वं सर्पवत् कार्य करोषि। यथा सर्प दंशाय धावति भवानपि धावति न समीचिनमिदम्। ततोऽधुनाऽपि मन्त्र साधना भवता करणीया। पुनरपि स गतः

द्वितीयवर्षपरिसमाप्तौ यदि स समागतः पूर्वनिर्दिष्टया स्त्रिया कचवर शोधनी राजकुमारस्य पादेन सह सङ्घटिता तदा स प्रबलतरकोपेन कर्कशवचनेन च तामाऽऽक्रोशति। तदाऽपि तेन महात्मना स प्रोक्तः – भो! अधुना त्वं न धावति, किन्तु सर्पवद् क्रोधाऽध्मातचित्तेन सर्पवत् स्वफणावचनेन परान् स्फोटयति। तन्न समुचितं, ततोऽद्यापि वर्षमेकं मन्त्रस्य जपं कुरु !

तृतीयवर्षपरिपूर्तौ समागतो राजपुत्रः। तदा च तया स्त्रिया तस्य राजकुमारस्योपरि वान्त भोजनस्य कुण्डं यदा प्रक्षिप्तं तदा मन्त्रजपप्रभावेण शान्त-प्रशान्त-निर्मल-शुद्धस्वभावः स प्रत्यवदत्।

हे मातः। अन्तिमवर्षत्रयेण मम क्रोध-शान्तिकरणाय भवती बहु समुद्यतवत्यसि। ततो भवत्या ममोपरि महदुपकारवर्षा कृताऽस्ति। नाऽहं कदाऽपि भवदुपकारं विस्मरिष्यामि। अधुना नाऽहं क्रोधं करिष्यामि। क्षमाभावो मया संप्राप्तः। अधुना मां स्वशिष्यं करिष्यति महात्माऽसौ। ज्ञानं च दास्यति।

स गतो तं महात्मासमीपं, महात्मनाऽथ स समाश्लिष्टः, प्रोक्तश्च धन्यवादार्हस्त्वम्। भोः! त्वं मम परीक्षानदीसमुत्तीर्णः। यतः क्रोधसंयुतो मानवः स्वस्थानं विस्मृत्य अगण्यं पापं समाचरति। पशोरपि हीनतरं कार्यं सज्जनीभूयाऽपि करोति। ततः सर्वपापमूलः क्रोधो विजेतव्यः। तत्पश्चादेवाऽऽत्मसाक्षात्कारो भवति नान्यथा। इत्थमस्माभिरपि क्रोधनिग्रहे प्रयासः कर्तव्यः।

॥ इति शम् ॥

# परमपदपन्थाः

## ॥ मृत्योर्द्वाराणि चत्वारि॥

– श्रेयःपथिकः

अनुचितकर्मारम्भः[1], प्रकृतिविरोधो[2] बलियसा स्पर्धा[3]।
प्रभुवचनेऽपि[4] विमर्शो, मृत्योर्द्वाराणि चत्वारि॥

मृत्योर्मुखे प्रवेशनाय चत्वारि द्वाराणि कल्प्यन्ते। अयं मृत्युः सकृन्मरणहेतु नैंव भविष्यति। किन्तु प्रतिजन्ममृत्योर्कारणं भवति। शाश्वतसौख्येण सह संयोगं न कारयति।

तत्राऽऽद्यम्।

**१) अनुचितकार्यारम्भः –** सज्जनः सर्वदा सर्वथा योग्यकार्यमेव समारभते। नानुचितं सेवते। यतोऽनुचितकार्यसेवनेनात्मनः दुःखं दुर्गतिश्च भवति। स इहभवेऽशान्तिं भवान्तरे निरन्तरं दुःखमाप्नोति। ततः स्वशक्ति-बल-पराक्रम-समृद्धिं विचिन्त्य कार्यं कर्तव्यम्। योऽविचिन्त्य कार्यं करोति स अनुचितकार्यारम्भकः कथ्यते।

**२) प्रकृतिना सह विरोधः –** प्रकृतिः त्रिविधाः प्रथमा स्वभावस्तु प्रकृतिः। द्वितीया सहजा कालस्वभावः प्रकृतिः। तृतीया शरीरप्रकृतिः।

तत्राद्यः स्वस्वभावस्थात्मनः, स तु विरागभावं समापन्नः, क्षमासहितः, नयसंयुक्तः, सौम्यताशुद्धः सौजन्यसमायुक्तः इत्यादिनैकस्वगुणवान्स्तस्य सद्गुणास्तु तस्य स्वभावः। सा प्रकृतिः, तस्या यो विरुद्धभावः स क्रोधादिः, सैव विरुद्धाप्रकृतिः सा एक मरणं प्रदाय नैव तिष्ठति किन्त्वनन्तमृतिप्रदात्री सा, ततः प्रकृत्या सह विरोधः = प्रकृते र्विरुद्धाचरणं न कर्तव्यः। इति प्रथमः।

द्वितीया प्रकृतिः कालस्वभावः, कालस्य ऋतुसंजातः भावः इति कालस्वभावः, इति तेन सह विरोधो न कर्तव्यः, ततो बहुधा दोषपोषश्च। अधुना तु दृश्यते नवीनविज्ञानपद्धत्या प्राचीना जीवनव्यवस्था विनाशमाप्ता प्रकृतिश्च दूषिता, नैका नवीना जीवनव्यवस्था समागता। पाश्चिमात्येन प्रेरिता। ततश्च संस्कृतिषु धर्मेषु प्रभूततरदोषसम्भवो दृश्यते। तेन सर्वेऽपि जना धर्म विस्मरन्ति पुनश्चाधर्मं प्रकुर्वन्ति आत्मानं च दूषयति।

**३) बलवत्सु स्पर्धाः –** कदाऽपि केनापि सार्धं सज्जनः न स्पर्धते। तर्हि कथं बलवता सह स्पर्धा? सा तु सुतरां न शक्येति। स्पर्धा-विजये उत्कर्षो मदोऽहङ्कारो भवति। पराजये कदाचित् स्वमानहानिरपि कदाचिदन्यायोऽपि भवति, इत्यादयो बहुधा दोषाः सम्भवन्ति। ततः स्पर्धा सदैव त्याज्येति।

**४) प्रभुवचने शङ्का –** प्रभु स्वस्वामी। न तस्य वचनं शङ्कनीयम्, स्वीकरणीयमेव। यदि प्रभुवचने कोऽपि शङ्कते, तदा स्वकार्यसिद्धि र्न भवति। ततः स्वामिनं प्रति विश्वसितव्यं कार्यं न कदापि तत्र शङ्का सङ्कल्प-विकल्पो वा कर्तव्यः। प्रभोर्वचनं निःशङ्कमेव स्वीकरणीयमिति। यः सेवकः शङ्कां करोति सोऽत्रोऽमुत्र नैकभवपरंपरादिरुपदुःखमाप्नोति।

**॥ इति शम् ॥**

# मधुरम्... मधुरम्...

## ॥ चिन्तनम् ॥

– श्रेयःपथिकः

अस्माभि र्यद् यत् शुभतरं श्रुतं, पठितं, पाठितं भवेत् तत्र चिन्तनं, मननं, मंथनं च कर्तव्यम्। तत् स्वं चान्यञ्च महल्लाभकरं भवत्येव न संशयः।

चिन्तनधारा कैवल्यमर्पयति। शुभचिन्तनं रसायणं, यत् ताम्रमपि स्वर्णं करोति। जडात्मानं चैतन्यवन्तं करोति।

महाराष्ट्रे सूर्याजीपंत नामकः शिष्टजनोऽवसत्। स बहुसमृद्धिमान् नाऽऽसीत्। किन्तु तस्य परिवारस्य निर्वाहः सुखं सुखेन भवेदीदृग् सोऽस्ति।

अन्यदा तत्पत्न्या तस्य नारायणपुत्रस्य द्वादशवर्षे एव लग्नं कारयितुं पुनः पुनः प्रेरितः न सुर्याजीना शुभामशुभां कन्यां दृष्ट्वा योग्या कन्या निर्धारिता नारायणस्यार्थं। लग्नोत्सवो निर्णीतः। लग्नक्रियाऽपि प्रारब्धा। क्रियामध्ये ''सावधान'' इति शब्दं पुनः पुनः श्रुत्वा नारायणेन चिन्तितं अये! किमिदं पुनः पुनः सावधानमिति। स तं शब्दं चिन्तितुं लग्नः पुनः पुनश्चिन्तनेन स सावधानोऽभवत्। स लग्नक्रियां तत्रैव त्यक्त्वा वनं प्रति धावितः। संन्यस्तधर्मो स्वीकृत स्तेन स्थापितं स्वनाम, समर्थस्वामीरामदास इति। एवं चिन्तनेन शुभभावना प्रादुर्भवति। चिन्तनेन स्वात्मस्वं प्राप्नोति नरः। चिन्तनेन नरो दोषजालं निराकरोति। चिन्तनेन बाह्याभ्यन्तरसमृद्धिं प्राप्नोति नरः। चिन्तनं चन्द्रचान्दनीसमं प्रकाशयत्यात्मानं, चिन्तनकारकनरः पुनः पुनः चिन्तनेन स्वात्मगुणसमृद्धिं लभते। स्वात्म-विकासं साधयति। दोषमार्गं त्यजति। समतागुणमासादयति। ममतापरित्यागं करोति। तेन कर्माणि नश्यन्ति। पापानां सञ्चयो न भवति। स्वात्मोन्नतिश्च प्राप्यते। ततश्चिन्तनं पुनः पुनः कर्तव्यमिति।

॥ इति शम्॥



# आत्मैश्वर्यप्राप्त्युपायः

– श्रेयस्करः

## ।। मदप्रबन्धः ।।

अष्टानि मदस्थानानि समयज्ञैः प्ररुपितानि सन्ति। मदेन नरो माद्यति। स्वमेव मानयति। स्वमेव पूजयति। न चान्यं विगणयति।

'मे ति' मरणं तद् 'देति' ददाति : अर्पयति तद् मदः, मरणं यो ददाति स मदः। तदपि न एकभवे, किन्तु भवे भवे इति।

अथवा 'मे ति' = ममत्वं यो 'दे ति' = ददाति स मदः। ममत्वभावं ममैवेदं इति पुनः पुनः शोचनम्, न मम सदृशं कस्याऽपि इदृशं, एतावदस्ति इति। सोऽष्टविधः निदर्शितो जिनैरत्र समासतो विवक्ष्यते।

नरो यस्मिन् विषये मदं करोति सो विषयस्तद् भवे भवान्तरे वा न्यूनं प्राप्नोति न वा प्राप्नोतीति।

**१) जातिमदः** = अस्माभिः श्रेष्ठां जातिं सम्प्राप्य यदि स्वोत्कर्षं क्रियते साहंकारो व्यवहारः क्रियते तदा स मदस्वरूपं प्राप्नोति। 'अहो ! ममैव उच्चा जातिः', नान्यस्य मम सदृशा जातिरिति विचारणा **जातिमदो** निरुच्यते।

**२) कुलमदः** = श्रेष्ठकुलजन्मना व्यक्तिना ''अहो ! ममैव उत्तमं कुलं'' इदृशो मम पिता इत्यादयः। अहमपि इदृश इति साहङ्कारा वृत्तिः **कुलमदः** समुच्यते।

**३) बलमदः** = यः स्वस्य प्रभूततरं सर्वैरधिकं बलं दृष्ट्वा साहङ्कारं वर्तते। परान् पीडयति स्वबलस्य च, गर्वं करोति। स तस्य **बलमदः**।

**४) रुपमदः** = स्वस्य प्रकृष्टं रुपं संप्राप्य परान् न गणयति। स्वमेव सर्वेषु महत्तमो मानयति। न केनाऽपि सार्धं विनयाद्यौचित्यपूर्णं व्यवहारं व्यवहरते कुरुपं जुगुप्सति एषा वृत्तिः **रुपमदः**।

**५) तपोमदः** = स्वस्य समुत्कृष्ट तपस्करणशक्त्या य साहङ्कारपूर्णं वर्तनं करोति स तत्करणेन तपस्स्वन्तरायकृत् कर्मणां बन्धको भवति। एष **तपमदो** भवति।

**६) ऐश्वर्यमदः** = यः स्वर्द्धि–समृद्धि–मान–सन्मानं संप्राप्य परानवगणयति। स्वैश्वर्यस्य पुनः पुनो दर्शनेन हर्षं विदधाति। पुनरन्यं च हीनतरं गणयति तदा **ऐश्वर्यमदो** भवति, स एवं करणेन ऐश्वर्याऽन्तरायकृत् कर्म समुपार्जयति।

**७) श्रुतमदः** = प्रभूततरश्रुतलाभेन यदि तत् श्रुतं न पचते तदाऽहङ्कारो भवति। श्रुतप्राप्त्या विनयो, नम्रता, सरलता, समर्पितता, अकदाग्रहः, प्रज्ञापनीयता इत्यादयो गुणाः प्राप्यन्ते। यदि श्रुतपरिणति र्न भवति तर्हि तदजीर्णं भवति[१] स एव श्रुतमदः।

**८) लाभमदः** = लाभमदसंयुतानां नराणां यदा महान् लाभो स्वल्पपुरुषार्थेन भवति तदा स्वलाभेन सर्वोत्तमोऽहमिति शोचनेन लाभमदं करोति। एषा वृत्तिः **लाभमदः**।

इति मदस्थानानि विज्ञाय मदत्यागे समुद्यमो कर्तव्यः **सज्जनैः**।

**।। इति शम् ।।**

---

१) अहो ! मामकं श्रुतं सर्वेभ्य उत्तमोत्तमं = इति चिन्तनं, स एव **श्रुतमदः**।

स्वादु-स्वादु
शुद्धं-शुद्धम्
सुखावहं-शुभावहम्

– श्रेयःश्रीः

# ।। विषयविजयः।।

बिभेषि यदि संसारान्, मोक्षप्राप्तिं च काङ्क्षसि।
तदिन्द्रियजयं कर्तुं, स्फोरय स्फारपौरुषम्।।

जन्मप्राप्त्या देहमाप्नोति जीवः। देहादिन्द्रियाणां समुत्पत्तिः तेषां च विषयाः, विषयैश्च अनुकूल-प्रतिकूल भावो मनसि, ततः कर्मबन्धः, तेन सुख-दुःखे, ततः संसारः, ततो मरणं, ततश्च पुनः जन्मप्राप्तिः। इति विषचक्रं चलति संसारे पुनः पुनः जीवात्मानाम्।

ननु विषयाः किदृशाः? विषसदृशाः सन्ति ते, यथा विषं मारयति नरं, तथैवेदमपि जीवानां भवे भवे पीडयति। विषयानां पञ्चभेदाः सन्ति।

**तत्राद्यः स्पर्शः** = शुभतरपदार्थस्य स्पर्शनेच्छा, अशुभस्य च त्याजनेच्छा स्पर्शः।

**द्वितीयो रसः** = मनोज्ञे स्वादे लोलता सा रसनाविषयः, रसनेन्द्रियाधीनतया जीवानां नवं नवं रसमास्वादनाय तीव्रेच्छा भवति तदिच्छापूरणाय तीव्रतरं पापमपि करोति सर्वं च विस्मरति। इन्द्रियाणां प्रबलतरमिन्द्रियं रसनमस्ति। यदि तस्य विजयो भवति तदा सर्वेषां विजयः, यदि तस्य न, तदा नान्येषाम्।

**तृतीयो घ्राणः** = नासिकया शुभतरं गन्धं समिच्छति नरो, नाशुभतरं तत्तु घ्राणेन्द्रियजन्यो विषयो भवति।

**चतुर्थः रुपम्** = नयनस्य विषयो रुपं भवति, शुभेऽशुभे रुपे या मनसः प्रवर्तनं तत्तु दर्शनविषयो भवति। अशुभे द्वेषबुद्धिस्त्याज्या, शुभे च रागवृत्तिस्तेनैव विषय विजयो भवति, नान्यथा।

**पञ्चमः शब्दः** = श्रोत्रेन्द्रियस्य विषयः शब्दः। शुभवचनश्रवणं मनः काङ्क्षति न काङ्क्षति नरोऽशुभं कर्कशं कठोरं शब्दश्रवणं। तत्र च शुभेऽशुभे राग-द्वेषपरिहारः स विजयो भवति।

विषयवासनया जीवोऽनादिकालेन वासितोऽस्ति। यदा तद्वासनां जीवो निराकरोति तदेन्द्रियजयो भवति-इति।

।। इति शम्।।

# आर्जवम्

।। आ ।।
आप्नोति ज्ञानम्
।। र् ।।
रहति = त्यजति कदाग्रहं
।। ज ।।
जयति मोहं
।। व ।।
वपति बोधिबीजम्
येन जीवस्तद् – आर्जवम्
आर्जवम् = ऋजो र्भावः
आर्जवम् = सरलभावः
यथा वेतसः सर्वदा सारल्यं तथैव
बालवत् सारल्यं संप्राप्य आत्महितार्थिभिः
स्वहितं क्रमेण स्वहितानुबन्धि
परहितमपि कर्तव्यम्।
अथवा
एकाक्षरीय कोषतः
।। आ।।
पीडा खेदः
।। र् ।।
तस्य छेदः
अथवा
वेदनं भवति
।। ज ।।
तस्य विजय करणम्
अथवा
तस्योपरि मत्सर भावग्रहणम्।
।। व।।
सान्त्वनं प्राप्नोति
अर्थात्
संयमः साधयति।
क्रोधादिपीडा छेदनेन सान्त्वनं सरलं=
संयमभावं प्राप्नोतीति = आर्जवम्।।
।। इति शम्।।

# रहस्याऽऽस्वादः

## ॥ स्त्रीणां चतुर्नवतिस्वरुपविशेषताः॥

– श्रेयःसखा

सर्वक्षेत्रे सर्वकाले स्त्रीणां स्वरुपं विषसदृशं पुरुषस्य सा दुर्गतिकारिणी किन्तु रागवान् जन एतन्न शोचयतीत्यतो वैराग्यप्रापणाय तेषां चतुर्नवतिस्वरुपविशेषणानि प्रत्यङ्कं क्रमशो निदर्श्यते।

**४) कैतवप्रेमगिरितटिन्यः** - कैतव–कपटरुपोऽथवा कुत्सितचेष्टास्वरुपो यः प्रेम तद्रुपो यो गिरि तत्रसंचरणकारिण्यः, निर्झरणस्वरुपा तटिन्यः = नद्यः अर्थात् स्त्रियः कपटरुपीप्रेमगिरिस्था नद्यः सन्ति। न तत्राऽऽस्था कर्तव्याऽल्पतराऽपि। न चाटुवचनेन तदाधीनं भाव्यम्। ता एव संसारसिंधुमज्जने नदीतुल्या।

**५) सहस्रापराधानामाऽऽस्पदं** - अपराधसहस्राणां स्थानभूताः स्त्रियः अतः स्वप्नान्तरेष्वपि कदाऽपि न विश्वसनीया स्त्रियः। यथा ब्रहमदत्तचक्रवर्ती माता, स्वकः पुत्रश्चक्रवर्ती भविष्यतीति जानाति तथाऽपि एतादृशं पुत्रं मारयितुं प्रयत्नमकरोत्। लाक्षागृहं निरमापयत्, प्राऽज्वालयच्च। याः स्वं पापं छादयति ततो नैकापराधस्य स्थानं स्त्रियः। यथा कुलवालकमुनिः संयमसाधनायां रक्तोऽभवत्। तस्य संयमप्रभावेण नद्या स्वकुलं = जलप्रवाहः वालितो, ''न महात्मनः संयमाराधने स्खलना भवतु'' इति। ततस्तन्नाम सर्वै विस्मृत्य कुलवालकः इति नाम स्थापितम्। इदृशोऽपि मुनिवरो मगधदेशसमागतया वेश्यया चलितः संयमात्। ततः स्त्रियः अपराधसहस्राऽऽस्पदम्।

**६) प्रभवः शोकस्य** - इयं स्त्रीः प्रभवः = उत्पत्तिस्थानम्, कस्य? शोकस्य। स्त्रीः शोकस्योत्पत्तिर्भवति। सर्वापत्तिनां मूलं सा निःशोकमपि गृहं सशोकं करोति सा। ससुखमपि जनं दुःखयुतं करोत्यहो। स्त्रीसंगेन केनाऽपि कारणेन दुःखप्राप्ति र्भवत्येव। एषः स्त्रीजनस्य प्रभावः। यथा सीतागमने – अपहरणे रामो दुःखं प्राप्तः। तद्वत् सर्वत्र स्त्रियः जनानां दुःखदायिका भवन्ति।

**७) विनाशो बलस्य** - बलस्य विनाशकरणस्वभावा स्त्री सा प्रथमं पुरुषस्य बलं विनाशयति। यथोक्तं–

दर्शने हरते चित्तं, स्पर्शने हरते बलम्।
सङ्गमे हरते वीर्यं, नारी प्रत्यक्षराक्षसी।।१।।

इत्येवं सर्वथा स्त्रियः पुरुषाणां बलसंहारकारिण्यः, अथवा बलं–सैन्यं तस्य विनाशं=क्षयं कारयति। कुणिकस्त्रीपद्मावतीवत्।

तथाहि–हल्ल–विहल्लसमीपं सेचनकहस्तिं वस्त्रयुगलं च दृष्ट्वा स्वपतेः पार्श्वं तानि मार्गयति सा। पद्मावती : तद। हल्ल–विहल्लाभ्यां न दत्तानि तानि। तत् कारणात् अस्मिन्नवसर्पिण्यां महाभयानकं युद्धमभवत्। सैन्यस्य च महाविनाशोऽभवत्। तत्राऽपि कारणं स्त्रीरेव।

**८) सूना पुरुषाणां** - सूना इति वधस्थानम् = मरणस्थानम् पुरुषाणां स्त्रियः। स्त्रियः पुरुषाणां वधनिमित्तं, वधकारणं, वधहेतुर्भवतीति न संशयः। यथा सूर्यकान्ता स्त्रीः प्रदेशीराजानो वधकारणं सञ्जाता। स्वसौख्यायासौ राजा न भावीति तस्य मारणोद्यताऽभवत्। एवं स्त्री पुरुषाणां सूना = वधस्थानरुपा भवति।

**।। इति शम्।।**

गृहं नाम स्वार्थिनां धाम ।।

# ।। काव्य कौतुकम् ।।

## पू.आ.श्री प्रेमसूरिगुरु गुणस्तवनम्

– श्रेयःसद्मा

(अनुष्टुप्)

ज्ञानेनाचारशोभा स्या–, दाचारात् ज्ञानशोभनम्।
तयोः प्रेमसूरिर्नित्यं, शोभते नैव संशयः।।१।।

चारित्रात् शोभते प्रेमश्, चरणं प्रेमसूरिभिः।
तयोर्धर्मस्य शोभा स्यात्, प्रेमसूरिं स्तुवे मुदा।।२।।

ब्रह्मगुप्त्या सदा शोभा, प्रेमसूरीश्वरस्य हि।
गुरुणा ब्रह्मगुप्तिश्च, शोभते चरणं तयोः।।३।।

सौम्यतया गुरुर्प्रेमः, शोभते शासने सदा।
गुरुभिः सौम्यताशोभा, समता च तयो स्तथा।।४।।

आदरात् शोभते शुद्धिः, शुद्धेश्चादरभावना।
तयोः शोभते नित्यं, धर्मपुष्टिः गुरोरहो! ।।५।।

समाधिना सदा शोभा, प्रेमसूरेः गुरोर्मम।
गुरुणा च समाधेः स्यात्, धर्ममर्मस्तयोः सदा।।६।।

प्रेमसूरीश्वरैः शोभा, गच्छस्य संभवत्यहो!।
गच्छे मम गुरोः शोभा, तयोः स्यात् शासनस्य च।।७।।

शोभा निर्लोभतायाः स्यात्, प्रेमसूरीश्वरै र्वरैः।
तया प्रेमगुरोर्नूनं, तयोः नूनञ्च वैभवः।।८।।

प्रेमसूरेः सदा शोभा, विषयत्यागतो भवेत्।
ततो विषयमुक्तिश्च, स्यात् तयोरपि संयमः।।९।।

गुरुणा शासनस्य स्यात्, शोभा वृद्धिश्च सर्वदा।
शासनात् शोभते प्रेमः, तयोः पृथ्वीपटं सदा।।१०।।

श्री सम्यग्दर्शनं प्रेम-सूरि दर्शनतो मतम्।
तेन श्रेयःपथो नित्यं, शोभते परमोज्वलः।।११।।

# वैविध्यम्.....

## ।। पुनर्भवनिश्चयः।।

– श्रेयःसेतुः

जीवा जन्म–मरणानि प्राप्नुवन्ति। किन्तु सर्वमनिच्छयैव तेषां भवन्ति। जन्म न स्वेच्छया, जीवनमपि स्वेच्छया, मरणमपि न स्वेच्छया।

जीवाः सर्वाणि कार्याणि कर्माधीनतया कुर्वन्ति। जीवा स्वयं कर्माणि कुर्वन्ति। स्वयं तु कर्माणि भुञ्जन्ते, स्वयं च नवं नवं जन्म प्राप्नुवन्ति विनाशयन्ति च कर्माणि। ननु जीवो नान्यं जन्म प्राप्नोति। जीवः पञ्चभूतात्मकोऽत्रैवोत्पद्यते, विपद्यते च। 'न', तत्–पश्चात् तस्यांशोऽपि तिष्ठति इति चेत्–'न', शास्त्रार्थवचनानभिज्ञानत्वात्। साम्प्रतमपि पुनर्भवनिश्चयकरा घटना घटामञ्चति। तथाहि–इन्दोरनगरे डॉ. कीर्तिस्वरुप रावत आचत्वारिंशद्वर्षं पुनर्जन्मनो घटनां संघटयति। संशोधनं च करोति। तेन च पञ्चशतं घटना पुनर्जन्मनः प्राप्ता। पञ्चाशदधिकद्विशतं घटनाः स्वपरिश्रमेण दृष्टाः सन्ति।

तत्र ई.सं. १९६९ तमे वर्षे राजस्थाने लक्ष्मणगढग्रामे सुनिता नाम्ना कन्या जाता, यदा सा किञ्चित् महत्तरा भूता, तदैव सा वदति–नाऽहं सुनिता। अहं तु शकुन्तलाऽस्मि। मम गृहमत्रतः अशीत्यधिकानि चतुर्शतयोजनप्रमितं पश्चादस्ति। इत्युक्त्वा तत् स्थलं, स्वस्नेहिनां परिचयश्च सत्यापितः। अकस्मातेन स्वमरणादिकं सर्वं यथाघटितमकथयत्। नैके संशोधकास्तत्र म्भू तैः सर्वं सूक्ष्मतया दृष्टं प्रकाशितं च। सर्व सत्यं प्रतीतम्। सर्वैः स्वीकृतम्। यत् पुनर्जन्म अस्ति।

ननु पुनर्जन्म अस्तीति स्वयं कथं ज्ञायते? अत्राह–जात जातिस्मरणेन ज्ञायते, यत् मयेदृशं जन्म प्राप्तं इत्यादयः। ननु जातिस्मरणं किम्? पूर्वाणां जातीनां स्मरणं कथं भवति? उच्यते–जीवानां जातिस्मरणं भवितव्यता योगेन सहजज्ञानावरणीय कर्म क्षयोपशमेन भवति।

एवं सर्वं ज्ञात्वाऽन्यजन्माऽस्तीति निश्चयं कृत्वा धर्मे मतिः स्थापनीया। तत्रैव प्रयत्नश्व कर्तव्यः इति।

।। इति शम्।।

# वैविध्यम्.....

## ।। नवामृतकुम्भाः।।

– श्रेयःसेतुः

नवेत्यभङ्गा सङ्ख्या। ततो नवमङ्गलकारकाः कुम्भाः सन्ति। मङ्गलरुपत्वात्, विघ्नहरत्वात् कुम्भानां सङ्ख्या नव इति स्वीक्रियते। अमरतां ददाति तद् अमृतम्। जीवन–मरण–रोग–जरादिकान् यन्नाशयति तद् अमृतम्।

तेऽमृतकुम्भाः नवेति शास्त्रसंदर्शिताः सन्ति। अथ ते नाम्ना विविच्यन्ते।

**प्रथमः कुम्भः करुणायुक्तं चित्तं** = तत् तु अमृततुल्यं, यतो यस्य करुणार्द्रचित्तमस्ति स परेषां शान्तिं प्रदास्यति। यदि यः परेषामानन्दयति स स्वं सुतरामानन्दयति तेन सोऽमरणरुपममृतस्थानं प्राप्नोति इति।

**द्वितीयः कुम्भः मधुरतायुक्तं वचनं** = सर्वेऽपि जीवा मधुरमेव वचनं श्रोतुमिच्छन्ति। ततो यदि सर्वेऽपि मधुरवचनेन यदि जल्पन्ति, तदा न कदापि कस्याऽपि संक्लिष्टपरिणामस्यापत्ति र्भवेत्। इति मधुर वचनं वक्तव्यम्।

**तृतीयः कुम्भः प्रसन्नतोपेता दृष्टिः** = वचनमधुरतायाः चित्तप्रसत्तिर्भवति, तेन च साभ्यंतराऽऽनन्दः स प्रसन्नतोपेतं वदनं स्वं परञ्च प्रसादयति अतः प्रसन्नता प्राप्तव्या।

**चतुर्थः कुम्भः क्षमायुक्ता शक्तिः** = सद्भुतशक्तियुक्तानां क्षमाधर्मोऽपि यथार्थरुपो भवति। स सर्वं कार्यं साधयति, तथाऽपि तत्र क्षमा स्पष्टतरैव दृश्यते।

**पञ्चमः कुम्भः श्रुतयुक्ता मतिः** = साऽपि क्षमा, विना श्रुतज्ञानं न भवति, सैव श्रुतज्ञानं परिणतं करोति। यदि परिणति र्न, तदा श्रुतज्ञानस्य न मूल्यमपि अतः श्रुतज्ञानयुक्ता मति र्हि प्रशस्ता।

**षष्ठः कुम्भः दाने प्रयुक्ता लक्ष्मीः** = दानकरणे संप्रयुक्ता लक्ष्मीः। श्रुतज्ञानस्य परिपाकं विना लक्ष्मीर्दानाय प्रयोक्तुं न शक्यते। श्रुतेन ज्ञायते यत् ''चला लक्ष्मी'' इत्यादयः। तेनैव स श्रुतज्ञो दानं करोति, न परिग्रहं करोति। ततो लक्ष्मीः दानप्रयुक्ता हि प्रशस्ता।

**सप्तमः कुम्भः शीलशोभितं रुपम्** = रुपमपि तस्य शस्यं, यस्य शीलमपि शुभं भवति। शीलमपि प्रयत्नेन सिद्ध्यति नत्वन्यथा। ततो रुपवानपि शीलेन सहितः स प्रवर्तेत, तस्य शीलयुक्तं रुपमपि प्रशंसनीयम्।

**अष्टमः कुम्भः नम्रतायुक्तं श्रुतं** = पूर्ववर्णिता गुणकुम्भाः यत्र सन्ति, स नम्रतागुणयुक्तो भवतीति न संशयः।

**नवमः कुम्भः कोमलता सहिता सत्ता** = यदि स जनः श्रुत–नम्रता प्रभावेण सत्तां लभते तदापि कोमलतासहितैव सत्ताऽऽप्यते। सोऽन्येन सह माधुर्यपूर्णव्यवहारं करोति, न तत्र संशयः कार्यः।

।। इति शम् ।।



# साम्प्रतम्.....

## ॥ ज्ञानमात्मनः महत्तमो गुणः॥

– श्रेयःसद्मा

ज्ञानस्य पारायणमस्माभिः प्रारब्धो, ज्ञानं हि महद्धनं, ज्ञानं हि महत्तत्वं, ज्ञानं हि बलम्। आत्मनि वीर्यं, रुपं, आरोग्यं, दक्षत्वं इत्यादयः आत्मनः अनन्ता गुणाः सन्ति, तत्र महत्तमोगुणः ज्ञानमस्ति। यदि ज्ञानं विद्यते तर्हि अन्यगुणानां विवेचनं भवति। यदि जीवेषु ज्ञानं हि न विद्यते तर्ह्यन्यगुणस्य का कथा? अत एव जीवस्य यानि लक्षणानि सन्ति तत्राऽपि ज्ञानमेव प्राथम्यमधिगच्छति, तथाहि–

नाणं च दंसणं चेव, चरित्तं च तवो तहा।
वीरियं उवओगो य, एअं जीवस्स लक्खणम्॥१॥ (नवतत्व.)

जीवस्य लक्षणानि षड्, तत्रापि जीवलक्षणेष्वपि ज्ञानं प्रथमं भवति, तेनैव भगवद्वचने श्रद्धा = दर्शनं भवति, यदि दर्शनं श्रद्धारुपं न भवति, तदा तत्श्रद्धया कथं चरणं शुभं भवेत्। यदि आचरणं शुभं न तदा कथं तस्मिन् तस्मिन् कार्ये सहनशीलता भवति। सहनशीलता हि तपस्स्वरुपा। तपः करणे या शक्तिः, या भावना, वीर्यं भवति, तदपि कार्यसाधने समुपयुक्तं भवत्येव, तत्र न संशयः। जीवस्य सर्वाणि लक्षणानि ज्ञानगुणस्य पश्चादेव प्रवर्तन्ते ततो ज्ञानगुणः महत्तमः।

'पढमं नाणं तओ दया' इति दशवैकालिकागम सूत्रेऽपि दर्शितं। जीवो प्रथमं ज्ञानं प्राप्नोति, तदैव ''कथं दया पालनीया?'' इति तस्य बोधो

भवति। यदि ज्ञानं हि न भवेत् तदा दया कथं? दया केषां इत्यादिकं ज्ञानस्याऽसंभवे कथं भवति? ततो ज्ञानं प्रथमं दयाऽपि पश्चात् इति सत्यं भगवद् वचनम्। सर्वसंसारत्यागकृतां साधूनामपि ज्ञानमावश्यकं, विना ज्ञानं साधवोऽपि संयमं साधयितुं न शक्नुवन्ति, यदुक्तम्–

जो जीवे वि न याणेइ, अजीवे वि न याणेइ।
जीवाजीवे अयाणंतो, कहं सो नाहीइ संजमं।। (दश. वै. अ. ४)

यो जीवं न जानाति, योऽजीवं न जानाति, स कथं संयमं ज्ञास्यति। इत्येवं सुविस्तृतं ज्ञानस्वरुपं शास्त्रेषु दर्शितमस्ति, तत्तु पुनः पुनः श्रद्धागम्यं कर्तव्यम्। ज्ञानं दीपकः, ज्ञानं उद्योतकृत्ः, ज्ञानं तेजः। ज्ञानं हि सर्वकार्येषु साफल्यमूलमस्ति। ज्ञानं हि सच्चेतना कथिता। ज्ञानं हि परं स्वात्मबलं, मोक्षमार्गे प्रथमं चरणं ज्ञानं। अतोऽपि प्रभूततर ज्ञानस्वरुपमस्ति, तत्तु ज्ञातव्यमस्ति। यो ज्ञानं जानाति स हि तदुपार्जने प्रयत्नातिशयवान् भवती ति न संशयः।

।। इति शम् ।।

यत्र सुखमल्पं, दुःखञ्चानल्पं,
स एव संसारः।।

# वादः न वितण्डावादः

## ।। सन्मेधा-प्रागट्यम्।।

– श्रेयःकान्तः

(संवादः)

दृश्यम्–पञ्चमम् (कालस्य दृश्यम्)

**नेपथ्यं**- शनैः शनैः कालो गच्छति। कलनं कालः कालः द्रव्यमस्ति। स शनैः शनैः र्गच्छति। स नूत्नं पुरातनं करोति। पुरातनं च पुनः पर्यायान्तरेण नवीनमपि करोति। नवीनमपि वस्तु निरुपयोगिनं करोति यदा, तदा तन्नष्टं, परिजीर्णं भवति, तत्र काल एव कारणं नान्यः।

काल एव परो वस्तु, सर्वत्र तस्य चेष्टितम्,
नूत्नं जीर्णं करोत्यहो, जीर्णं नूत्नं तनोत्यहो।।१।।
कालेनाऽऽप्यते सौख्यं, दुःखं कालेन नित्यशः।
काले सिध्यन्ति कार्याणि, काले नश्यन्ति तान्यपि।।२।।
काले बलं क्षयः काले, कालाधीनमिदं जगत्।
कालः सदा बलीयान् हि, पुरुषस्य न पौरुषम्।।३।।

(अन्यदा नूतने परिशीलनकक्षे वृद्धो गृहस्वामी दृश्यते, तत्र न समीपं न च दूरं, अन्तरा उपविष्टा दृश्यते।)

**लालनः** - चिन्तानिमग्नां अन्तरां दृष्ट्वा पृच्छति। किं चिन्ताकारणम्?

**अन्तरा** - न किमपि, किन्तु मनीषो मम पुत्रः सर्वपुत्रेषु श्रेष्ठतमो ज्येष्ठतमः। स बुद्धि–प्रतिभा–नम्रता–सरलता–समर्पितता–विनय–सौजन्यादिगुणेषु पराकाष्ठां प्राप्तः। न केनापि सार्धं तस्य तुलना भविष्यति। अधुना स यौवनस्थः प्रबलतररुप–लावण्यशाली विद्यते। किन्तु तस्य प्रायोग्या कन्या न दृश्यते मया, तेन मनश्चिन्तातुरं।

तेजस्वी बहुधा प्रतापकिरणो, कश्चित् कदा नापरः,
सूर्यस्यैव प्रतापभासुरकरः, पुष्पेषु स्यात् सौरभम्।
चन्द्रः पूर्णः सौम्यताञ्च भजते, नान्यः कदा कश्चन,
रात्रौ यस्तमसः प्रभावप्रसरः, प्रात स्तथा किं भवेत्?।।१।।



तत् तस्य प्रायोग्या कन्या कथं प्राप्तव्या? ततः कृपां कृत्वा मम मनीषस्य योग्यां कन्यां दर्शयतु।

**लालनः** - सुष्ठु प्रस्तावः भवतीनाम्। किन्तु भवत्या पृष्टो न वा मनीषः?

**अन्तरा** - अत्र किं प्रष्टव्यम्? यदि कन्या लभ्यते तदा प्रष्टव्यं, सैव न लभते, तदा तस्य किं प्रष्टव्यम्?

**लालनः** - न ज्ञातो ममाशयः भवत्या, मया श्रुतं केनापि पार्श्वात्, यथा-न मनीषस्य परिणेतुमिच्छा, तच्छ्रुत्वाऽन्तरा पुनः चिन्ताकुला सञ्जाता।

**अन्तरा** - केनेदं भवते कथितम्?

**लालनः** - तस्य मनीषस्य मित्रेण वसन्तेन प्रोक्तमिदम्।

**अन्तरा** - भवतेदं श्रुत्वा तन्मित्रं किमपि न पृष्टम्?

**लालनः** - पृष्टो मया सः।

**अन्तरा** - किं पृष्टम्?

**लालनः**- मया तन्मित्रस्य पृष्टम्, परिणयनार्थं मनीषस्येच्छा न वर्तते तत्र किं कारणम्? तदा तन्मित्रेण प्रोक्तं-सुविस्तृताऽत्र घटनाऽस्ति। घटना यदि घटते तदा जीवो न शोचति यत् कः परिणामः समागंष्यते। यदा तस्य परिणामः समागच्छति तदैव ज्ञायते, नान्यथा। ततो मया तदैव निश्चयो कृतो यद् कदापि किमपि कार्यं कर्तव्यं भवेत् तदा शतकृत्वः शोचितव्यम्, पश्चादेव कर्तव्यम्। विना विचारं यदि कार्यं क्रियते ततः पश्चातापस्यावसरो आगच्छति। ततो मयाऽयं निर्णयः ममित्रसमीपं वनदेवीसमक्षं च कृतोऽस्ति। इति मम वसन्तेन कथितम्। अहं तु सावधानमनसा श्रुणोमि, किन्त्वन्तरे! ममाधुना गन्तव्यं। सायं यदाऽहं समागमिष्यामि तदैव कथयिष्यामि। या घटना मम प्रोक्ता तन्मित्रेण, सा प्रभूततरा महतीति धैर्यमत्र कर्तव्यम्।

यतः सूक्तिरस्ति अर्धकथिता मधुरतरा भवतीति।

**॥ इति शम् ॥**

# ।। काव्यप्रतिभाविष्कारः ।।

______________________________

______________________________

______________________________

**श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छाशने ।।१।।**

(शार्दूलविक्रीडितम्)

एनं चतुर्थपादमाश्रित्य स्वप्रतिभया गुणसङ्कीर्तनं कृत्वा अस्मान् प्रेषयतु, यथोचितं काव्यं अग्रिमे श्री प्रेमसूरीश्वरसङ्कीर्तनाभिधे विशेषाङ्के नाम्ना प्रकाशयिष्यते।

– सम्पादकः

# लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-ऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्। * स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते * नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी। * ये लेखा निर्णितप्रकाशनदिनात् मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते। * तदनन्तरं-प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्। *गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव। *अर्थभेदस्थान एव ''अवग्रहः'' कर्तव्यः। *अनुस्वारानुनासिक-योर्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वार-स्तत्रानुस्वाकरणे न बाधा। *लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणा-मेवाधिकारो भविष्यति। * अधुळा येन लेखो लिखितो भवेत् तं प्रार्थयेऽहम् न कदाऽपि ''अज्ञातकर्तृकः'' इति कृत्वा प्रेषणीयो भवेद्। अज्ञात इति प्रयोगः प्राचीनेषु भवत्येव इति ज्ञातव्यम्।



संसारार्त्तिविभेदनैकवणं,
**निःश्रेयसं** गीयते,
सम्यग्ज्ञानसुरापगां वितनुतां,
**निःश्रेयसं** भास्वरम्।
सद्धीवैभववारिधिः प्रविलसेत्,
**निःश्रेयसेनाद्**भुतो,
वर्णन्याससुरम्यकाव्यरचना,
**निःश्रेयसाया**ऽस्तु मे।।१।।

वाक्शुद्धिं प्रतिभां नवां च लभते,
**निःश्रेयसाद्** वाचकश्,
चत्वारो गुणखण्डका गुणकरा,
**निःश्रेयसस्या**ङ्गणे।
कीर्तिर्मुक्तिकरी च सद्गुणकरी,
**निःश्रेयसे** संभवेत्,
सद्भावैः समतादिकैः शुभकृते,
**निःश्रेयस !** स्यात् सदा।।२।।

प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Print: Deepak Oswal, Pune
Ph: 24477791, 9822055891